चतुर्थः पटलः

अधिवासपमण्डपं तदर्हेऽह्न्यथ सङ्गृह्य गुरुर्विशोधयेत।
रुचिरैः परिभूषितं वितानप्रमुखैर्मृष्टसुलिप्तभूमिभागम्।।१।।

विमर्शिनी

अथाधिवासदिवसे प्रातरेव मण्डपसंस्कारादिकं कर्तव्यमिति विवक्षन् पटलमारभते-आधिवासनमण्डपमिति। अथ गुरुः स्वयं तदर्हे तद्योग्ये अह्नि रुचिरैः सुन्दरैः वितानप्रमुखैः वितानाच्छादनाधैः परिभूषितं परितोऽलङ्कृतं मृष्टसुलिप्तभूमिभागं मार्जनालेपनाभ्यां शोभितभूप्रदेशम् अधिवासनमण्डपं देवस्याधिवासनार्थं संपादितं मण्डपं संगृह्य विशोधयेत विशेषेण शोधयेत।।१।।

विवरणम्

अथाधिवासदिवसे दिवाकार्यं सर्वं वदन् अधिवासमण्डपसंस्कारमारंभते–अधिवासनमण्डपमिति। तदर्हेह्नीति। तदुचिते दिवसे। दिवैवेत्यर्थः। सङ्गृह्योति। प्रासादपरिप्रग्रहवन्मण्डपपरिग्रहो द्रष्टव्यः। विशोधयेतेति। वक्ष्यमाणप्रकारेणेति भावः। वितानप्रमुखैरिति।

Shripuram Publications
www.shripuram.org

वितानस्तम्भपरिवेष्टनादिभिः।

"घण्टाचामरमालाभिर्धूपदीपाष्टमङ्गलैः।
पल्लवैश्शालिकणिकैर्मुक्तादामफलादिभिः।।" अपि चेति।

मृष्टसुलिप्तभूमिभागमिति लैकिकमार्जनलेपनमुक्तम्। युदुक्तं–

"वेदिकां च तथालिन्दं प्राङ्गणं परिशोध्य च।" इति।।१।।

स्नात्वा शुद्धनवीनवस्त्रपरिधाय्याचम्य तन्मण्डपं स्वास्त्रेक्षादिनिरस्तभूतनिवहं प्रविश्य पर्येत्य च। नैर्ऋत्यामुपविश्य शोधितसमिष्टात्माथ विघ्नेश्वरं संपुज्याभिहितक्रमात् त्रिगुणसूत्रादीनि संसादयेत्।।२।।

विमर्शिनी

तच्छोधनविधानमाह- स्नात्वेति। गुरुर्विशेषतः स्नात्वा शुद्धनवीनवस्त्रपरिधायी शुंद्धेन नवेन वस्त्रेण परिहितो भूत्वा आचम्य स्वास्त्रेक्षादिनिरस्त भूतनिवहं स्वस्वास्त्रेक्षणादिना निरस्तोऽपसारितो भूतसमूहो यत्र तन्मण्डपं प्राविश्यान्तर्गत्वा पर्येत्य चालिन्दमार्गेण परितश्च गत्वा नैर्ऋत्यां निर्ऋतिकोणे उपविश्य शोधितसमिष्टात्मा आत्मनः शोधनं मन्त्रभावनं शङ्खपूरणमात्माराधनं च कृत्वा अथ विघ्नेश्वरं संपूज्य त्रिगुणसुत्रादीनि अभिहितक्रमात् प्रासादशोधने अभिहितेन क्रमेण संसादयेत्[1]।।२।।

विवरणम्

स्वास्त्रेक्षादिनिरस्तभूतनिवहमिति। स्वास्त्रनिरीक्षणादिभिर्मण्डपे सम्भाव्यमानभूतनिरासः प्रथमतः कार्य इति। तदुक्तम्–

"ततस्तालत्रयच्छोटीपार्ष्णिघातनिरीक्षणैः।
दिव्यान्तरिक्षभूमिष्ठान् विघ्नान् द्वारगतान् हरेत्।।
प्रधानद्वारमासाद्य नाराचास्त्रं प्रयोजयेत्।"

इति। पुनस्तालत्रयाद्यग्निप्राकारान्तं विधायाधिवासमण्डपस्यान्तर्नाराचास्त्रं क्षिप्त्वेत्यत्र तालत्रयादिकमिदानीं वास्त्रतः प्रोक्ष्य चेत्येतदनन्तरं वा कार्यम्। स्वास्त्रेण निरीक्षणादीनि कार्याणि। तेषां क्रमानियमः। यद्वा निरीक्षणं नाराचास्त्रक्षेपणं च

१. 'त्।। निर्गत्येशाद्यन्तमेतत् समन्ताद् व्यस्ताव्यस्तेनोदितेन ध्रुवेण। वर्मास्त्राभ्यां वेष्टयेद् वा त्रितन्तुदर्भस्रग्भ्यां मण्डपं नीप्रदेशे।।' ख. पाठः

Shripuram Publications
www.shripuram.org

प्रधानमित्येवमभिधानम्। प्रविश्येति। प्रधानद्वारेणेति शेषः। पर्येत्य चेति। अलिन्दमार्गेणेति भावः। शोधितसमिष्टात्मेति देहशुद्ध्याद्यात्माराधनान्तमुक्तम्। अभिहितक्रमादिति। प्रासादशुद्धिविधाविति भावः।।२।।

विप्राननुज्ञाप्य निरेत्य मुख्यद्वारास्त्रतः प्रोक्ष्य च मण्डपं तत्।
ईशादि नीप्रोपरि तन्तुदर्भस्रग्भ्यां यथोक्तं परिवेष्टयेच्च।।३।।

विमर्शिनी

विप्रान् दानैरनुज्ञाप्य मुख्यद्वारा प्रधानद्वारेण निरेत्य निर्गत्य अस्त्रतः तन्मण्डपं च प्रोक्ष्य तालत्रयादि कृत्वा तन्तुकुशस्रग्भ्यां नीप्रोपरि नीप्रस्योपरिभागे यथोक्तमीशादीशपर्यन्तं परिवेष्टयेच्च।।३।।

विवरणम्

विप्राननुज्ञाप्योति। 'दत्त्वा धेनूर्द्विजेभ्य' इत्याद्युक्तं सर्वमभिप्रेतम्। यथोक्तमिति। ईशान्तं व्यस्तसमस्तताराभ्यामित्यर्थः।।३।।

सर्वत्राप्यथ तोरणांश्चतसृषु[१] प्रागादिदिक्षु क्रमात्
केतूंश्चाष्टसु द[२]र्भपल्लवप[३]टीसंभूषितान् स्थापयेत्।
द्वौ द्वौ द्वार्यथवा हरीशमाहिषार्योस्तोरणाभ्यन्तरे
विन्यस्येद् वृषवाहने नवसु दिक्षूर्ध्वावसानं पुनः।।४।।

विमर्शिनी

अथ सर्वत्र सर्वदेवेष्वपि पूर्वद्वारप्राधान्ये पश्चिमद्वारप्राधान्येपि प्रागादिष्वेव चतसृपु दिक्षु क्रमात् तोरणान् स्थापयेत्, दर्भपल्लवपटीसंभूषितान् दर्भैः पल्लवैः पताकया च समलङ्कृतान् केतून् ध्वजांश्च अष्टसु प्रागादिदिक्षु। हरीशमाहिषार्योः अथवा द्वारि तोरणाभ्यन्तरे तोरणस्यान्तर्भागे द्वौ द्वौ केतून् विन्यस्येत्। वृषवाहने पुनर्नवसु दिक्षूर्ध्वावसानम् ऊर्ध्वगतमन्त्यमीशानकोण एव विन्यस्येत्।।४।।

विवरणम्

केतूंश्चाष्टस्विति। प्रागादिदिक्ष्वित्यनुषङ्गः। दर्भपल्लवपटीसम्भूषितानित्युभयेषां

---

१. 'ष्वाशासु पूर्वादितः', २. 'दिक्षु प', ३. 'ताकादर्भसंभूषितान्। द्वौ' ख. पाठः

Shripuram Publications
www.shripuram.org

विशेषणम्। पटी तोरणेष्वावेष्टनपटः। ध्वजेषु तत्पट्टिकेति भेदः। तोरणेषु स्रगलङ्करणमपीष्यते। द्वौ द्वाविति। केतुशब्दोऽनुवर्तते। तोरणाभ्यन्तर इति। पूर्वत्र दिग्ध्वजानामपि समानम्। ऊर्ध्वावसानमिति। नवमं ध्वजमैशवाह्य उपरिबुद्ध्या विन्यसेत्। यदुक्तम्– 'नवमश्शिवसन्निधावि'ति।।४।।

प्लाक्षौदुम्बररौहिणाश्चलदलोत्थश्चेश्वरे तोरणाः
सार्ये ते गुहविघ्नयोर्वटभवान्त्यास्ते हरीशाच्युते।
प्रोक्ताः प्लाक्षचतुर्थपैप्पलपुरोगास्तेऽपि मध्यस्थयुग्-
व्यत्यासान्महिषद्विषि स्युरखिलेऽपीष्टा ध्वजा वैणवाः।।५।।

विमर्शिनी

तोरणदीनाह– प्लाक्षेति। सार्ये शास्तृसहिते ईश्वरे प्लाक्षौदुम्बररौहिणाश्चनदलोत्थश्च। रोहिणो वटः। चलदलोऽश्वत्थः। तोरणाः तोरणबृक्षाः प्रोक्ताः स्युः। गुहविघ्नयोः वटभवान्त्याः ते प्लक्षोदुम्बराश्वत्थवटाः। हरीशाच्युते शिवनारायणविष्ण्वोः प्लाक्षचतुर्थपैलपुरोगाः ते अश्वत्थोदुम्बरवटप्लक्षाः। महिषद्विषि तेऽपि मध्यस्थयुग्व्यत्यासाद् अश्वत्थवटोदुम्बरप्लक्षाः। आखिलेऽपि वैणवाः ध्वजाश्चेष्टाः स्युः।।५।।

विवरणम्

ते गुहविध्नयोर्वटभवान्त्या इति। प्लक्षोदुम्बराश्वत्थवटजाः। हरीशाच्युत इति। पिप्पलोदुम्बरवटप्लक्षजाः। तेऽपि मध्यस्थयुग्व्यत्यासादिति। प्लक्षवटोदुम्बराश्वत्थजाः।।५।।

द्वारां पार्श्वयुगे कृतास्त्रखननादिक्षिप्तदर्भाक्षता-
दीष्टाब्जासनकेऽवटेऽस्त्रविहितोक्षादीन् क्रमात् तोरणान्।
योगेयोगऋचाङ्घ्रियुग्भिरपि देवस्येति शूलैः सुयो-
ज्योत्तिष्ठेत्याधिदैवनाम*भिरपि न्यस्येच्छिवे मन्त्रवित्।।६।।

---

* 'नाममनुर्भिन्र्यस्येच्छिवे' इति विवरणरित्या पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

स्थापनक्रियामाह– द्वारामिति। मन्त्रबिद् मन्त्रविशेषज्ञो गुरुः शिवे द्वारं द्वाराणां पार्श्वयुगे पार्श्वद्वये कृतास्त्रखननादिक्षिप्तदर्भाक्षतादीष्टाब्जासनके कृतमस्त्रेण खननादि खननहरणगोमयजलोक्षणाानि यत्र, क्षिप्तं दर्भाक्षतादि दर्भाक्षतगन्धपुष्पाणि च यत्र, इष्टं पूजितं 'पद्माय नमः' इति पीठं च यत्र, तस्मिन्नवटे गर्त्ते अस्त्रविहितोक्षादीन् अस्त्रेण कृतोक्षणादीन्। आदिशब्देन शोषणादिकं, स्वास्वनाममन्त्रेण प्राणायामः पूजनं चोच्यते। तोरणान् क्रमाद् योगेयोगऋचा 'योगे योगे तवस्तरमि'ति मन्त्रेण अङ्घ्रियुग्भिः पादद्वयैः, 'देवस्य त्वे'ति मन्त्रेण शूलैरपि सुयोज्य 'उत्तिष्ठे'त्यृचा आधिदैवनामभिः 'प्रमोदाय नमः' इत्यादिनाममन्त्रैरपि न्यस्येत् स्थापयेत्।।६।।

विवरणम्

कृतास्त्रखननादिक्षिप्तदर्भाक्षतादीष्टाब्जासनक इत्येकं पदम्। पूर्वमस्त्रेण द्वार्दक्षिणवामपार्श्वबहिर्भागे तोरणपादोचिततया खननं पांसुनिर्हरणं गोमयजलालेपनं प्रोक्षणं च कृत्वा प्रणवेन गन्धपुष्पाक्षतोपेतान् ह्रस्वदर्भान् निक्षिप्य पद्ममात्रं पीठमर्चयेदित्यभिप्रायः। अस्त्रविहितोक्षादीनिति। अस्त्रप्रोक्षणं प्रागुक्तदर्भाद्यलङ्करणं शोषणादिकं तत्तन्मन्त्रप्राणायामपूजनमित्येतत्सर्वमुक्तम्। स्थापनांनन्तरमेव वस्त्रस्रगलङ्करणमुचितमिति। क्रमात्तोरणानिति। शिवे 'उत्तिष्ठे'त्याधिदैवनाममनुभिर्न्यस्येदित्यन्वयः। पादैश्शूलैश्च योजनमस्त्रप्रोक्षणानन्तरं कार्यमिति ज्ञेयम्। मन्त्रविदिति प्रणवपुटितत्वं नमोन्तत्वमप्युक्तम्।।६।।

तैरेवेषुभवेऽथ तैर्मुररिपौ स्योनापृथिव्या युतै-
र्वेदाद्यैर्महिषारिशास्तृगणपेष्वीशाच्युते तारतः।
प्राग्द्वार्दक्षिणपार्श्वपूर्वविहितस्थानेषु संस्थापयेत्
केतूं[1]श्च क्रमाविद् द्वयेषु यजतामावाह्य तद्देवताः।।७।।

१. 'तानामयो' घ पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

इषुभवे तैरेव अधिदैवनामभिरेव, अथ मुररिपौ स्योनापृथिव्या ऋचा युतैस्तैरधिदैवनामाभिः, महिषारिशास्तृगणपेषु वेदाद्यैः 'अग्निमीळे' 'इषे त्वा' 'अग्न आयाहि' 'शन्नो देवीः' इति चतुर्भिर्मन्त्रैः ईशाच्युते तारतश्च न्यस्येत्। पुनः क्रमवित् स्थानक्रमं मन्त्रक्रमं च वेत्ता गुरुः प्राग्द्वार्दक्षिणपार्श्वपूर्वविहितस्थानेषु प्राग्द्वारस्य दक्षिणं पार्श्वं, दक्षिणद्वारस्य पश्चिमं पार्श्वमित्यादिविहितेषु स्थानेषु केतूंश्च तथा संस्थापयेत्। द्वयेषु तोरणेषु ध्वजेषु च तद्देवता आवाह्य यथोक्तरीत्या यजताम्।।७।।

विवरणम्।

तैरेवेषुभव इति। अधिदैवनाममनुभिरेवेत्यर्थः। अस्त्रविहितोक्षादीन् क्रमात् तोरणानिति सर्वेष्वपि सम्बन्धनीयम्। वेदाद्यैर्महिषारिशास्तृगणपेष्विति। 'अग्निमीळे' इषेत्वोर्जे त्वा' 'अग्न आयाहि वीतये' शन्नो देवीरि'त्येभिर्वेदादिभवैर्मन्त्रैः क्रमात्तोरणान् स्थापयेत्। नैषु तत्तद्देवता[१]मन्त्रयोग इति भावः। ईशाच्युते तारत इति। यदुक्तम्-

"प्रणवेन तु संस्थाप्य पूजयेत् स्वैश्च नामभिः।"

इति। प्राग्द्वार्दक्षिणेति। प्राग्द्वारस्य दक्षिणपार्श्वपूर्वकेषु केतूंश्चाष्टसु द्वौ द्वौ द्वारीत्येवं विहितेषु स्थानेष्विति। प्राग्द्वारदक्षिणपार्श्वे तोरणाभ्यन्तरे पुनरग्निकोणे [२]ततो दक्षिणद्वारस्य पश्चिमपार्श्वे तोरणाभ्यन्तरे पुनर्निर्ऋतिकोणे इत्यादि। तथा प्राग्द्वारदक्षिणपार्श्व उत्तरपार्श्वे च तोरणाभ्यन्तरे [२]ततो दक्षिणद्वारपश्चिमपार्श्वे पूर्वपार्श्वे चेत्यादि इति। एतदेव सर्वं क्रमविदित्युक्तम्। द्वयेषु यजतां आवाह्य तद्देवता इति। द्वयेषु तोरणेषु ध्वजेषु च तत्तत्तोरणस्थापनानन्तरं तत्तद्देवतामपि तस्मिंस्तस्मिन्नावाह्य पूजयेत्। पुनस्तत्तद् ध्वजस्थापनानन्तरं तत्तद्देवताः तस्मिंस्तस्मिन्नप्यावाह्य पूजयेत्। अङ्गाभावे व्यापकमात्रं सकलीकरणम्। यद्वा प्रणवेन षडङ्गविधिः। अथवा अं सुशोभनाय नमः। आं हृदयाय नमः इं सुशोभनाय नमः ईं शिरसे स्वाहेत्यादीनि षडङ्गानि स्युः।।७।।

सुशोभनः शाङ्र्गधरे सुभद्रः सुकर्मनामा च तथा सुहोत्रः।
शिवे प्रमोदाभयशान्तसंज्ञा महांश्च चत्वार इति प्रदिष्टाः।।८।।

---

१. 'तानामयो' घ. पाठः, २. 'पूर्वदक्षिणद्वारप' घ. पाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

विमर्शिनी

देवताः पठति - सुशोभन इत्यादिभिः। शाङ्र्गधरे सुशोभनः सुभद्रः सुकर्मनामा सुहोत्रश्च प्रदिष्टाः उक्ताः। अत्रत्या नामसंज्ञाभिधाह्वयादिकाः क प्रत्ययश्च स्वतोऽर्थ-विशेषाभावात् पद्याविरोधार्थमेव कल्पिताः। शिवे प्रमोदाभयशान्तसंज्ञा महांश्च इति चत्वारः।।८।।

विवरणम्

इदानीं तद्देवता उपदिशति - सुशोभन इति।।८।।

सुमङ्गलः स्थाणुहरौ सुहोत्रस्तथैव कल्याणकभद्रकौ च।
यज्ञेशनामा महिषाभिमातौ प्रभाकरो मङ्गलसुप्रभौ च।।९।।

विमर्शिनी

स्थाणुहरौ सुमङ्गलः सुहोत्रः तथा कल्याणकभद्रकौ च। महिषाभिमातौ महिषशत्रौ यज्ञेशनामा प्रभाकरो मङ्गलसुप्रभौ च।।९।।

षाण्मातुरे स्युर्वरदो यशोदो द्वौ पुष्टिदश्रीप्रदसंज्ञितौ च।
विघ्ने सुपूर्णाह्वयपूर्णभद्रौ प्रशान्तनामा विजयाभिधश्च।।१०।।

विमर्शिनी।

षाण्मातुरे वरदो यशोदः पुष्टिदश्रीप्रदसंज्ञितौ द्वौ च। विघ्ने सुपूर्णा[1]ह्वयपूर्णभद्रौ प्रशान्[2]तनामा विजयाभिधश्च।।१०।।

आर्यः शास्ता गुहासन्नः सेनानीश्च प्रभापतौ।
इति सप्तसु संप्रोक्ताः क्रमात् तोरणदेवताः।।११।।

विमर्शिनी

प्रभापतौ आर्यः शास्ता गुहासन्नः[3] सेनानीश्च। इति सप्तसु देवेषु क्रमात् तोरणदेवताः संप्रोक्ताः।।११।।

---

१. 'ज्या' ख. पाठः, २. 'न्ति' क. पाठः, ३. 'नः' ख. पाठः

Shripuram Publications
www.shripuram.org

कुमुदकुमुदाक्षसंज्ञौ लक्ष्मीशे पुण्डरीकवामनकौ।
अथ शङ्कुकर्णसर्वादिकनेत्रौ सुमुखसुप्रतिष्ठितकौ।।१२।।

विमर्शिनी।

लक्ष्मीशे कुमुदकुमुदाक्षाद्या ध्वजेशाः। सर्वादिकनेत्रः सर्वनेत्रः।।१२।।

विवरणम्।

वामनकसुप्रतिष्ठितकवीरभद्रकेषु ककारो वृत्तानुरोधार्थ एवेति ज्ञेयम्।।१२।।

भृङ्गीशकार्त्तिकेयौ वृषनन्दीशौ शिवे महाकालः।
कुम्भोदरो महोदरनामाथो वीरभद्रको ब्रह्मा।।१३।।

विमर्शिनी

शिवे भृङ्गीशाद्या नव।।१३।।

शिवशार्ङ्गिणि गिरिशोत्सवविधास्यमानाः स्युरष्ट नन्द्याद्याः।
भृङ्गीशाद्या नव वा कुमुदात्माद्यैस्तथाष्टभिः सहिताः।।१४।।

विमर्शिनी

शिवशार्ङ्गिणि कुमुदात्माद्यैरष्टभिः सहिताः गिरिशोत्सवविधास्यमानाः शिवस्योत्सवे वक्ष्यमाणा नन्द्याद्या अष्ट स्युः 'नन्दिने कुमुदात्मने नम' इत्यादयः। तथा कुमुदात्माद्यैरष्टभिः सहिताः भृङ्गीशाद्या नव वा। 'भृङ्गीशाय कुमुदात्मने नम' इत्याद्यष्ट। नवमे 'ब्रह्मणे नम' इत्येव।।१४।।

विवरणम्

कुमुदात्माद्यैरिति। यथा 'नन्दिने कुमुदात्मने नम' इत्यादि, 'भृङ्गीशाय कुमुदात्मने नम' इत्यादि। नव वेति। भृङ्गीशादिपक्षे नवसु दिक्षूर्ध्वावसानमित्येतदिष्यते। तत्र नवमे ध्वजे केवल एव ब्रह्मा पूज्य इत्यपि प्रतिपादितं भवति।।१४।।

काली कराली विरजा मन्दरा विन्ध्यवासिनी।
सुप्रभा सिंहवक्त्रान्त्या दुर्गायां दैत्यमर्दिनी।।१५।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

दुर्गायां कालीकरालाद्याः। अन्त्या दैत्यमर्दिनी च।।१५।।

गोप्ता च पिङ्गलाक्षश्च वीरसेनश्च शाम्भवः।
त्रिणेत्रशूलिनौ दक्षभीमरूपौ च शास्तरि।।१६।।

विमर्शिनी

शास्तरि गोप्त्रादयः।।१६।।

स्कन्ददन्तीन्द्रमुखयोरिन्द्राद्या दिगधीश्वराः।
इति सप्तसु संप्रोक्ताः क्रमेण ध्वजदेवताः।।१७।।

विमर्शिनी

स्कन्ददन्तीन्द्रमुखयोः, दन्तीन्द्रमुखो गणपति, इन्द्राद्या दिगधीश्वराः लोकपाला एव। इति सप्तसु देवेषु क्रमेण ध्वजदेवताः संप्रोक्ताः।।१७।।

इष्ट्वा बलिं तोरणदेवताभ्यो ध्वजाधिपेभ्योऽपि च वाद्यहृम्।
दत्त्वा समाचम्य समेत्य चान्तः समाचरेद् द्वारघटार्चनाद्यम्।।१८।।

विमर्शिनी

एवमिष्ट्वा तोरणदेवताभ्यो ध्वजाधिपेभ्योऽपि च वाद्यहृद्यं वाद्यघोपैर्मनोहरं यथा भवति तथा बलिं दत्त्वा समाचम्य अन्तः समेत्य द्वारघटार्चनाद्यं समाचरेच्च।।१८।।

विवरणम्

इष्ट्वेति। बलिदानाङ्गतया पूजोक्ता। बलिं दत्त्वेत्यन्वयः। शुद्धान्नेन भूतक्रूरहविषा वायं बलिः। ‘सर्वधान्येन सम्पन्नं पललेन विमिश्रितम्’। इति चोक्तम्।।१८।।

प्राग्द्वार्दक्षिणसौम्यपार्श्वसमुपक्रान्त्या चतुर्दिक्ष्वपि
द्वाः स्थान् पूर्णघटेषु विष्णुगुहविघ्नार्येश्वरेषु द्विशः।
द्वाः शाखासु यजेत वा शिवहरौ द्वाःस्थानिहाष्टासु दि-
क्ष्वाशेशान् कलशेषु केवलममून् वै तेषु सुम्भद्विषि।।१९।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

विष्णुगुहविघ्नार्येश्वरेषु पञ्चसु चतुर्दिक्ष्वपि द्विशः द्वौ द्वौ पूर्णघटेषु पूरितकलशेषु प्राग्द्वार्दक्षिणसौम्यपार्श्वसमुपक्रान्त्या पूर्वद्वारस्य दक्षिणोत्तरपार्श्वक्रमेण तथा दक्षिणस्य पश्चिमपूर्वक्रमेण तथान्ययोरपि तत्क्रमेणारभ्येत्यर्थः, द्वाःस्थान् यजेत्। शिवहरौ द्वाःशाखासु द्वाःस्थान् यजेत वा न वा। इह शिवहरौ अष्टासु दिक्षु कलशेषु आशेशान् लोकपालान् यजेत। सुम्भद्विषि तेषु कलशेषु केवलममून् आशेशान् वै यजेत।।१९।।

विवरणम्

प्राग्द्वार्दक्षिणसौम्यपार्श्वसमुपक्रान्त्येति। यथा प्राग्द्वारस्य दक्षिणपार्श्वे सौम्यपार्श्वे च दक्षिणद्वारस्य पश्चिमपार्श्वे पूर्वपार्श्वे चेत्यादि। द्वाश्शाखासु यजेत वा शिवहराविति। प्राग्द्वार्दक्षिणसौम्यपार्श्वसमुपक्रान्त्येति सम्बध्यते। द्वाराणां द्विद्विशाखयोः द्वौ द्वौ द्वाःस्थावुक्तक्रमेण पूजयेत्, नवा पूजयेदित्यर्थः। अष्टासु दिक्ष्विति। द्वाःस्थपूजने तदपूजनेऽपि प्रागाद्यष्टदिक्षु कलशेषु इन्द्राद्यष्ट दिक्पालाः पूज्या इत्यर्थः। यदुक्तम्-

“द्वाःस्थौ सम्पूजयेद् द्वारशाखयोर्मध्यतोऽधिपान्।
इन्द्रादीन् पूर्णकुम्भेषु”

इत्यादि। केवलममून्वै तेषु सुम्भद्विषीति। प्रागाद्यष्टदिग्गतपूर्णकुम्भेषु केवलमिन्द्रादिदिक्पालानेव वा पूजयेत्। यद्वा, तोरणकलशैस्सहैव दिक्कलशेष्विन्द्रादिपूजा। यद्वा तोरणकलशैस्सह द्वारकलशपूजेति विकल्पाभिप्रायः। यदुक्तम्-

“तोरणध्वजमूलेषु घटेष्वर्च्याः स्वदेवताः।
दिक्क्रमादष्टकुम्भेषु दिगीशान् वा समर्चयेत्।।”

इति। यज्ञेशादयस्तोरणकलशदेवताः कालीकराल्याद्याश्च ध्वजमूलगतद्वारकलश-देवता इति।।१९।।

पद्मरागं प्रवालं विडूरोद्भवं
पुष्यनीलाश्मगर्भाणि मुक्ताफलम्।
स्फाटिकं च न्यसेत् विष्णुविष्वीशयो-
र्द्वारकुम्भेषु हेमापि वा सर्वतः।।२०।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

विष्णुर्विष्णवीशयोर्द्वारकुम्भेषु[१] पद्मरागं प्रवालं विडूरोद्भवं वैडूर्यं पुष्यनीलाश्मगर्भाणि, अश्मगर्भं मरतकं, मुक्ताफलं स्फाटिकं च न्यसेत्, सर्वतः सर्वत्र हेम स्वर्णमपि वा।।२०।।

विवरणम्

हेमापि वा सर्वत इति। वैष्णवापेक्ष एव विकल्पः। सर्वतः सर्वेष्वपि कलशेषु तोरणकलशेषु दिक्कलशेष्वपीत्यर्थः। यदुक्तम् -

"साधारेष्वथ कुम्भेषु जलपूर्णेषु देशिकः।
सहिरण्येषु सर्वेषु मण्डितेष्वथ लोकपान्।।"

इति।।२०।।

द्वारपाला हरौ पूर्णपुष्करानन्दनन्दनाः।
वीरसेनसुषेणौ च सम्भवप्रभवौ क्रमात्।।२१।।

विमर्शिनी

हरौ पूर्णपुष्कराद्याः द्वारपालाः क्रमात् स्युः।।२१।।

स्थाणौ महोदरमहाकायमहाकण्ठका महोरस्कः।
अग्न्यादिजिह्वनेत्रौ तदनु विरूपाक्षको विशालाक्षः।।२२।।

विमर्शिनी

स्थाणौ महोदराद्याः। अग्न्यादिजिह्वनेत्रौ अग्निजिह्वोऽग्निनेत्रश्च।।२२।।

विवरणम्

महाकण्ठकविरूपाक्षकगजास्यकमेघनादकेषु ककारो वृत्तानुरोधार्थ एव।।२२।।

वीरमहाद्यौ स्वाद्यो भद्राद्यश्चारुपूर्वकः सेनाः।
षष्ठो गुहे सुषेणः सेनावथ पूर्णचित्रपूर्वौ च।।२३।।

१. 'वृष्णीश' ख. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

गुहे वीराद्याः सेनाः। वीरमहाद्यौ वीरसेनो महासेनश्च। स्वाद्यः सुसेनः। भद्राद्यो भद्रसेनः। चारुपूर्वकश्चारुसेनः। षष्ठः सुषेणश्च। अथ पूर्णचित्रपूर्वौ सेनौ पूर्णसेनश्चित्रसेनश्च।।२३।।

विवरणम्

वीरमहाद्याविति। यथा वीरसेनो महासेन इत्यादि।।२३।।

गणराजि वज्रदन्तो गजास्यको भीमनाममहिषास्यौ।
अथ मेघनादकविरूपाक्षौ वरदश्च सर्वभक्षश्च।।२४।।

विमर्शिनी

गणराजि वज्रदन्ताद्याः।।२४।।

विवरणम्

भीमनामा भीम एव।।२४।।

वीरबाहुमहावीरविद्युद्दन्तविलासिनः।
आर्ये तीक्ष्णस्तीक्ष्णदन्तस्ताराक्षश्च भवोद्भवः।।२५।।

विमर्शिनी

आर्ये वीरबाह्वादयः।।२५।।

महोदरादयस्तेऽष्टौ पूर्णात्मादिभिरष्टभिः।
सम्भेदिता हरिहरे द्वारपाला इतीरिताः।।२६।।

विमर्शिनी

हरिहरेपूर्णात्मादिभिरष्टभिः सम्भेदिता युक्तास्ते महोदरादयोऽष्टौ। 'महोदराय पूर्णात्मने नमः' इत्यादयः। इति द्वारपाला ईरिताः।।२६।।

www.shripuram.org

Shripuram Publications
www.shripuram.org

विवरणम्

महोदरादयस्तेऽष्टाविति। यथा 'महोदराय पूर्णात्मने नमः' 'महाकायाय पुष्करात्मने नमः' इत्यादि।।२६।।

सहस्रवीची विमला शतादि-
धारा प्रमोदिन्यपि धूर्जटौ स्युः।
अर्च्याश्चतुस्तोरणकुम्भकेषु
दिक्पा हरौ मन्त्रविदा स्वमन्त्रैः।।२७।।

विमर्शिनी

धूर्जटौ चतुस्तोरणकुम्भकेषु चतुर्षु तोरणमूलस्थकलशेषु सहस्रवीची विमला शतादिधारा शतधारा प्रमोदिन्यपि स्युः। हरौ तु तेषु मन्त्रविदा इन्द्रादीनां मन्त्रज्ञेन दिक्पा अर्च्याः स्युः।।२७।।

विवरणम्

दिक्पा हराविति। इन्द्रयमवरुणसोमाः। मन्त्रविदेति। सर्वत्रावहनादिप्रयोगाभिज्ञत्वम्। प्रणवेन द्विद्विस्वरमध्यगस्वमन्त्रेण वाङ्गाभिज्ञत्वं चोक्तम्। यद्वायमाशयः - ओं इन्द्राय सुराधिपतये सायुधवाहनाय सपरिवाराय नमः इत्यादयो मन्त्रा इति। दिक्कलशेष्वपि समानमेतत्। तथान्येऽपि तोरणध्वजाधिपा द्वारतोरणकलशवासिनश्च सपरिवारा विभावनीयाः। तदुक्तम् -

"एता स्वगणयुक्ता वै पूज्या देव्यस्तु सर्वदा।
सुरारिपिशिताशा वै सर्वदुष्टभयङ्कराः।" इति।।

कालीकराल्याद्यभिप्रायेण एता इति निर्देशः। इति।।२७।।

कुम्भभद्रादिकौ कर्णौ श्वेतगोपूर्वकावपि।
शिवशाङ्गींश[1]योर्द्वारमध्येऽर्च्या द्वारदेवताः।।२८।।

विमर्शिनी

शिवशाङ्गींशयोर्द्वारमध्ये कुम्भभद्रादिकौ कर्णौ कुम्भकर्णो भद्रकर्णश्च,

---

१. 'शसेनानीरर्च्याः स्युर्द्वार' ख. पाठः

Shripuram Publications
www.shripuram.org

श्वेतगोपूर्वकावपि कर्णौ श्वेतकर्णो गोकर्णश्च द्वारदेवता अर्च्याः।।२८।।

अग्न्यादीशदिगन्तमुक्तविधिना मुष्ट्यादिभिः शोधयेत्
सिद्धार्थादिभिरेव वा सशिखिकुण्डं मण्डपान्तःस्थलम्।
प्रागास्योऽञ्जलिना त्रिधात्र विकिराञ्छक्त्यात्मनि प्रोत्किरेत्
सिद्धार्थान् विकिरांश्च रक्षतु सशेषान् मार्जनोपार्जितान्।।२९।।

विमर्शिनी

क्रियाशेषमाह - अग्न्यादीति। मुष्ट्यादिभिः सिद्धार्थादिभिरेव वा, पक्षद्वयेऽपि सशिखिकुण्डम् अग्निकुण्डसहितं मण्डपान्तःस्थलं प्रासादशुद्धावुक्तविधिना अग्न्यादीशदिगन्तं शोधयेत् अग्निकोणादीशकोणान्तं प्रदक्षिणगत्या शोधयित्वा पुनरग्न्यादीशान्तमपि पूर्वभागं शोधयेदित्यर्थः। शक्त्यात्मनि भुवनेश्वर्यां पूर्णपुष्पाञ्जलिं विधाय मण्डपं शक्तिमयं ध्यात्वा अत्र मण्डपे प्रागास्यो भूत्वा अञ्जलिना विकिरान् त्रिधा प्रोत्किरेत् पूर्वं मध्ये पुनर्दक्षिणोत्तरपार्श्वयोश्च। मार्जनोपार्जितान् मार्जनेन स्वीकृतान् सशेषान् पात्रेऽवशेषितांश्च सिद्धार्थान् विकिरांश्च रक्षतु।।२९।।

विवरणम्

वेद्याश्शुद्धिमभिधत्ते - अग्न्यादीशदिगन्तमिति। उक्तविधिनेति। पुरा प्रासादशुद्धौ 'दिष्टमनुना मुष्ट्याद्ययान्तर्बहिरि'त्याद्युक्तविधानेनेत्यर्थः। सिद्धार्थादिभिरेव वेति। 'मुष्ट्या शकृद्वारि वा पश्चात् सर्षपमुष्टी'ति मुष्ट्यादिपक्षस्सिद्धार्थादिपक्षश्चोक्तः। सशिखिकुण्ड-मिति। यथासन्निधानं पूर्वादिकुण्डशोधनमुक्तम्। कुम्भेशवर्धनीस्थलमपि औचित्या-च्छोधनीयम्। मण्डपस्यान्तःस्थलं वेदी भवति। धूपदीपान्ता शुद्धिस्सर्वापीहोक्ता। तत्र विकिरविकिरणं गव्यानन्तरमक्षतविकिरणानन्तरं वोक्तम्। तत्प्रकारमुपदिशति - प्रागास्य इति। प्राग्द्वारेऽपि मण्डपे वेदिपश्चिमदिशि प्राङ्मुखस्तिष्ठन्नञ्जलौ पूर्णं विकिरं गृहीत्वा तेनाञ्जलिनैव तद्विकिरं वेद्यां पश्चिमादिप्रागन्तपातबुद्ध्या विकिरेत्। पुनस्ततो दक्षिणतः प्राङ्मुखस्तिष्ठन्नप्येवं विकीर्य, उत्तरतस्तथा तिष्ठन्नप्येवं विकिरेदिति।

"विकिरान्विकिरेत्तिष्ठंस्त्रिधा चोत्तानपाणिना।" इति[१]।

सर्वत्र विकिरणमपीष्यत एव। तथा चोक्तम् - प्राङ्मुखस्तिष्ठन्नुत्तानपाणिना

१. 'ति। पुनः स' घ. पाठः

Shripuram Publications
www.shripuram.org

विकिरान् मण्डपमध्ये दक्षिणवामयोर्विकीर्य पुनस्सर्वत्र विकीर्येति। तदा च कुण्डेष्वपि त्रेधा विकिरणम्। पुनस्तत्र सर्वत्र विकिरणं च कार्यमिति।।

"शक्त्यात्मनीति सङ्कल्प्य शक्तिरूपं च मण्डपम्"

इति चोक्तम्। विष्णौ श्रीबीजेन। इतरेषु शक्तिबीजेन। मण्डपं शक्तिरूपं ध्यात्वा, तेनैव जलगन्धादिभिरभिपूज्य विकिरप्रयोग इति भावः। सिद्धार्थानिति। सिद्धार्थविकिरण-काले तावदैशपर्यन्तं विकीर्य सिद्धार्थशेषान्वितं तत् पात्रं तत्र निदध्यात्। पुनर्मार्जनकाले मार्जनेनापि विकीर्णसिद्धार्थानैशदेशे सञ्चित्य पूर्वनिहिततत्पात्रे सङ्गृह्णीयात्। तच्च पुनर्वर्धनीपीठे तत्परिभ्रमणानन्तरं विनियोक्तुं कुत्रचित् सङ्गृह्य रक्षेद्, एवं विकिरमपि कुम्भेशपीठे विनियोक्तुं सङ्गृह्य रक्षेदिति। वक्ष्यति च 'अथ पुरार्जितान् सर्षपानि'त्यादि।।२९।।

मध्येवेदि समिष्टपीठनिजशक्त्यास्थापितं मूलतो
देवेशं दिगधीश्वरानपि दिशास्वभ्यर्च्य कृत्वा ततः।
पुष्पास्त्रप्रविमोचनं च परितो धूपं प्रदीपं तथा
न्यस्यारक्षतु मण्डपात्मकममुं चा[1]स्त्रत्रितालादिना।।३०।।

विमर्शिनी

मध्येवेदि वेदिमध्ये समिष्टपीठनिजशक्त्यास्थापितं समिष्टे पीठे निजायां शक्तावावाहितं देवं मूलतो दिशासु दिगधीश्वरानप्यभ्यर्च्य ततः पुष्पास्त्रप्रविमोचनं परितः पुष्पेणास्त्र[2]मन्त्रेण क्षेपणं च कृत्वा तथा धूपं प्रदीपं च न्यस्य मण्डपात्मकममुं देवम् अस्त्रत्रितालादिना अस्त्रेण तालत्रयादिना आरक्षतु।।३०।।

विवरणम्

मध्येवेदीति। 'पारे मध्ये षष्ठ्या वे'ति समासः। समिष्टपीठनिजशक्तिः तस्यां आस्थापितं मूलत एवावाह्य सकलितम्। मूलतोऽभ्यर्च्येति सम्बन्धः। वेदिमध्ये स्वस्तिकमालिख्य तत्र स्वं पीठं सम्पूज्य तस्मिन् मण्डपशक्तेः शक्त्यात्मनि प्रोत्क्रिरेदिति भावनामात्रसिद्धां निजशक्तिमेव तन्मन्त्रेणावाहनसकलीकरणपूजनैः सम्यग् विभाव्य तस्यां मण्डपात्मिकायां देवमपि तन्मन्त्रेण समावाह्य पूजयेत्। मध्ये विकिरपक्षे विधानमेतत्।

---

१. 'देवं त्रि' इति मूलकोशपाठः, २. 'स्त्रं' ख पाठः

www.shripuram.org

अन्तर्विकिरपक्षे त्वयं विशेषः। शक्तिविभावनायां कृतायां विकिरविकिरणं पुनर्मध्ये देवोऽपि पूजनीयः। यद्वा, शक्तिपूजायामेव तस्यां देवोऽप्यावाह्य पूजनीय इति। पक्षद्वयेऽपि देवपूजायां प्रागादिदिक्षु इन्द्रादिलोकपालानपि सह पूजयेत्। यद्वा, तेषां तत्तद्दिक्षु स्वस्तिकेषु पूजा। "यदुक्तं -

"...परितो दिक्षु यजेद्दिङ्नायकानपि।
तारनामस्वाधिपत्यहेतिवाहनपार्षदैः।।"

इति। मण्डपात्मिकायाः शक्तेर्मार्जनालेपनादिस्थूलशोधनवत् भूतसंहारादिशोधनमप्युचितम्। तदुक्तम् - 'धूपदीपानन्तरं तच्छक्तिमात्मनि संहृत्य भूतसंहारधारणानन्तरं तच्छक्तिप्रतिसङ्क्रमणं कृत्वा भूतसर्गानन्तरं तन्मन्त्रप्राणायामव्यापकाङ्गानि कृत्वा पीठपूजापूर्वकमावाह्य मण्डपशक्तिं पूजयेत्' इति। केचिद् वेदिमध्ये तच्छक्तिपूजामेव वदन्ति-

"पूजयेद्गन्धपुष्पैश्च शक्तिं मण्डपभूगताम्।"

इति। श्रीबीजेनावाह्य साङ्गं सम्पूज्य दिक्ष्विन्द्रादीन् यजेदिति च। वैष्णवत्वात् श्रीबीजेनेत्युक्तम्। इति।

"शक्तौ मण्डपरूपिण्यां शान्त्यतीता तु मध्यतः।
प्रागादिद्वारदेशेषु शान्त्याद्याः क्रमतः कलाः।।
वेद्यामाधारशक्त्याद्या धर्माद्याः स्तम्भगोचराः।
चतुर्वंशेष्वधर्माद्याः सत्त्वाद्यास्तद्गुणास्पदाः।।
मायाविताने विद्या च कल्पनीया विधानतः।"

इति। शक्तेः सकलीक्रियायामेतद् भवति। पुनः पुष्पास्त्रमोचनादि सर्वं कार्यमिति। मण्डपात्मकममुं देवमिति। शक्तिमयमण्डपस्यान्तरात्मतयावस्थितमित्यर्थः।।३०।।

अथ शिं[1]वदिशि पार्जन्यांश[2]के वा लिखित्वा
वसुदलकमलं तद्दक्षिणे स्वस्तिकं च।
सरसिरुहि सशालीवस्त्रदर्भादिपीठे
न्यसतु कलशनाथं[3] स्वस्तिके कर्करीं च।।३१।।

---

१. 'खलु शिवकोणे देशिकः कल्पयित्वा' क. पाठः, २. 'न्येऽपि वा कल्पयित्वा', ३. 'राजं स्व' ख. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

कुम्भेशपूजामाह - अथेति। अथ तदनन्तरं शिवदिशि पार्जन्यांशके वास्तुगतपर्जन्यस्यांशे वा वसुदलकमलम् अष्टदलं पद्मं तद्दक्षिणे स्वस्तिकं च लिखित्वा सशालीवस्त्रदर्भादिपीठे शालीसहितवस्त्रदर्भतण्डुलादिभिः कृते पीठे सरसिरुहि पद्मे कलशनाथं कुम्भेशं, स्वस्तिके कर्करीं सनालं कुम्भं च न्यसतु।।३१।।

विवरणम्

इदानीं कुम्भेशपूजां वक्तुमारभते - अथ शिवदिशीति। वास्तुपदाभिप्रायमेतत्। तत्रालिन्दोद्देश ईशानपदे पर्जन्यपदे वेति। वसुदलकमलमिति। अष्टदलं पद्मम्। तच्च पीठपर्यन्तं स्यात्। सरसिरुहीति। तस्मिन् कमले। कलशराजमिति। कुम्भेशन्यग्बिलतया सादनमेतदुक्तम्। स्वस्तिके कर्करीं चेति। न्यसत्वित्यनुषज्यते। शालिदर्भवस्त्रादिभिः पीठरचनमिहाप्युचितं कार्यम्।।३१।।

आराध्य योगासनमत्र तोयैः सिक्तं प्रसक्तं गुणगन्धधूपैः।
सुसंस्कृतं न्यस्तकुशाद्यमिष्टं घटं समुत्तानितमात्तकूर्चम्।।३२।।
सहेमरत्नाक्षतगन्धपुष्पं सुधीः समापूर्य जलैश्च पूतैः।
तत्रे[1]ष्टवर्णाम्बुरुहोपविष्टमूर्त्यन्तरुद्यत्स[2]कलात्मतत्त्वे।।३३।।
त्र्याधारपद्मेष्वभिवाह्य चात्मविद्यापराख्यान्यपि तत्त्वकानि।
सर्वेषु सम्पूजयतु त्रिणेत्रे परांशसम्प[3]न्नशिवानि मन्त्री।।३४।।

विमर्शिनी

तत्पूजाविधानं सूत्रयति – आराध्येत्यादिभिः। अत्र अष्टदलपद्मे पीठे योगासनमाराध्य तोयैः सिक्तं क्षालितं, गुणगन्धधूपैः प्रसक्तं गुणेन वेष्टितं गन्धेन लिप्तं धूपेन धूपितं च, सुसंस्कृतं धारणादिभिः शोधितं, न्यस्तकुशाद्यं कृतदर्भविन्यासगन्धजलोक्षणादिकम्, इष्टं पूजितं, समुत्तानितं यथाविधि स्थापितम्, आत्तकूर्चं, सहेमरत्नाक्षतगन्धपुष्पं हेमरत्नाक्षतगन्धपुष्पैर्योजितं घटं सुधीः मानसपूरणकृद् गुरुः पूतैर्गालितपूजितैर्जलैश्च समापूर्य इष्टवर्णाम्बुरुहोपविष्टमूर्त्यन्तरुद्यत्सकलात्मतत्त्वे इष्टे लिपिपङ्कजे उपविष्टाया मूर्तेरन्तः प्रकाश्यमानैः कलासहितैरात्मनस्तत्त्वैश्च युक्ते तत्र कलशे त्र्याधारपद्मेषु

१. 'समिष्ट', २. 'त्परचित्यमुष्मिन्।।' ख. पाठः, ३. 'म्भि' क. पाठः

www.shripuram.org
shripuram
www.shripuram.org

मूलाधारकलशगतमन्त्रमूर्त्तेर्मूलाधारहृदयभ्रूमध्येषु सर्वेषु देवेषु आत्मविद्यापराख्यानि तत्त्वानि 'ओं अं नमः परायात्मतत्त्वात्मने नमः' 'ओं उं नमः पराय विद्यातत्त्वात्मने नमः' 'ओं मं पराय परतत्त्वात्मने नमः' इति मन्त्रैस्तान्यावाह्य सम्पूजयतु च। त्रिणेत्रे परांशसम्पन्न-शिवानि परांशे परतत्त्वस्थाने योजितशिवतत्त्वानि 'ओं नं नमः शिवाय शिवतत्त्वात्मने नमः' इति मन्त्रेण च। मन्त्रीत्यनेन वक्ष्यमाणाद् ब्रह्मकलशपूजनात् पूजाविधानं स्वीकर्तव्यमिति सूचितम्।।३२, ३३, ३४।।

विवरणम्

तोयैः सिक्तमिति। 'अस्त्रेणासिच्य तोयै'रित्येतदुक्तम्। प्रसक्तं गुणगन्धधूपैरिति। गुणः सूत्रम्। 'कलयतु कवचेन त्रिसूत्रेणे'त्यादिकमुक्तम्। सुसंस्कृतमिति शोषणादिसंस्कार-पञ्चकम्। न्यस्तकुशाद्यमिति वक्ष्यमाणरीत्या दर्भन्यासगन्धोदकप्रोक्षणाक्षतविकिरणानि। इष्टमिति। मूलेन जलगन्धादिभिः पूजितम्। समुत्तानितमित्युत्तानीकरणं स्वपीठमध्ये विन्यसनं चोक्तम्। आत्तकूर्चमिति। आत्तः परिगृहीतो निक्षिप्ततया कूर्चो येनेति समासः। प्रणवप्रोक्षणपूर्वकमस्त्रप्रोक्षितयमादिसंस्कृतकूर्चन्यसनमनेनोक्तम्।।३२।।

सहेमरत्नाक्षतगन्धपुष्पमिति। अस्त्रप्रोक्षणादिसंस्कृतद्रव्यन्यासः। सुधीरिति मानसपूरणाभिप्रायम्। पूतैरिति। ऐशभागे कटाहादौ नवपटगालितैः। वरुणपूजाद्युपलक्षण-मेतत्। तत्रेति। तस्मिन् कलशे। इष्टवर्णाम्बुरुहेति। पूजिते वर्णाम्बुरुहे लिपिपङ्कज उपविष्टायाः आवाहितपूजिततया आसीनाया मूर्त्तेः अन्तरुद्यः भवति सकलात्मतत्त्वं यत्रेति, तत्रेत्येतद्विशेषणतया बहुव्रीहिः। इष्टवर्णाम्बुरुहायाः उपविष्टाया मूर्त्तेरिति वा स्यात्। तदा मूर्त्तौ लिपिपङ्कजपूजा लभ्यते। सकलात्मतत्त्व इति विद्यादेहावाहनाभिप्राय-मेतत्। सकलं हि सदात्मतत्त्वं हि विद्यादेहः। यद्वा सकलानि सर्वाण्यात्मतत्त्वानि स्वस्वदेवस्य तत्त्वानि यत्र तत् सकलात्मतत्त्वम्। विद्यादेहान्तस्तदवयवशक्तितया तत्त्वावाहनमप्यनेनोक्तम्। अथवा सह कलाभिरात्मीयतत्त्वैश्च वर्तत इति सकलात्मतत्त्वम्। मूर्त्तौ मूलाधाराद्यारत्रयेऽग्निसूर्यसोमकलानां विधिवदावाहनम्। विद्यादेहे तत्त्वावाहनं च। एवमुक्तं न्यासपूजान्वितं सर्वमावाहनमिति ज्ञेयम्।।३३।।

त्र्याधारपद्मेष्विति। मूलाधारे हृदये पुनर्भ्रूमध्ये मूर्धनि द्वादशान्ते वा। पद्मपदेनैतद् दर्शितं – पूर्वमग्न्यादिकलावाहना न कृता चेदिदानीं तासां न्यासमात्रमवश्यं कर्तव्यमिति।

---

१. 'प्रोक्षणय' घ. पाठः, २. 'न' ग. पाठः

Shripuram Publications
www.shripuram.org

त्रिनेत्र इति। परतत्त्वस्थाने शिवतत्त्वं स्यादित्यर्थः। मन्त्रीति। मन्त्रप्रयोगाभिज्ञः। यथा 'ओं अं नमः परायात्मतत्त्वात्मने नम' इत्यादि। शैवे तु 'ओं अं नमः शिवायात्मतत्त्वात्मने नम' इत्यादि। एतदपि परांशसम्भिन्नशिवानीत्यनेनैव लभ्यते। प्रणवादिपञ्चपदैरेषां पञ्चाङ्गन्यासः। प्रणवत्रयतत्त्वमन्त्रामन्त्रितपदादियोगोऽप्यावाहनधर्मो मन्त्रीत्येवोक्तः। 'ओं सं सों ह्रीं हं सः' इत्यादियोगोऽपीष्यत इति।।३४।।

तस्मिन् पल्लवचक्रिकादिघटिते तारोपचारादिना
देवेशं कलशेऽभिवाह्य निजमूलेनार्णत्त्वादिभिः।
साकल्यं परिकल्प्य कल्पविधिना दत्त्वोपहारान् क्रमात्
सम्पूज्याथ निवेद्य तोषणसपर्यां च प्रकुर्याद् गुरुः।।३५।।

विमर्शिनी

अथ गुरुः पल्लवचक्रिकादिघटिते पल्लवचक्रिकातण्डुलदर्भाक्षतफलगन्धां पुष्पैर्युक्ते तस्मिन् कलशे तारोपचारादिना निजमूलेन देवेशमभिवाह्य अर्णतत्त्वादिभिः लिपितत्त्वमूलाक्षराङ्गादिभिः साकल्यं सकलत्वं परिकल्प्य कल्पविधिना पूजापटले वक्ष्यमाणविधानेनोपहारान् क्रमाद् दत्त्वा सम्पूज्य निवेद्य तोषसपर्यां प्रसन्नपूजां च प्रकुर्यात्।।३५।।

विवरणम्

पल्लवचक्रिकादिघटिते इति। पल्लवाद्यलङ्करणं कलशपटले[१]वक्ष्यमाणरीत्या कार्यम्। तारोपचारादिना निजमूलेनेत्यन्वयः। अर्णतत्त्वादिभिरिति मूलाक्षराङ्गादिग्रहणम्। कल्पविधिनेति। स्वागमोक्तरीत्या पूर्वं कलशपूजाक्रमकथनमेदानीं कल्पविधिनेत्यभिधानं च पूजासङ्कोचाकरणार्थमिति बोद्धव्यम्।।३५।।

प्रक्लृप्तयोगासनपूजनादिकां
गलन्तिकां गालितवारिपूरिताम्।
ततो निजास्त्रेण कृताभिवाहनां
प्रकल्पिताङ्गाममुना प्रपूजयेत्।।३६।।

---

१. 'लभाविरी' ग. घ. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

ततः प्रक्लृप्तयोगासनपूजनादिकां कृतपीठपूजादिकां, गालितवारिपूरितगालितैर्जलैः पूरितां, निजास्त्रेण कृताभिवाहनां स्वस्वास्त्रेण कृतावाहनां प्रकल्पिताङ्गाम् अस्त्रमन्त्रस्याङ्गैः कृताङ्गां गलन्तिकां कर्करीम् अमुनास्त्रेण प्रपूजयेत्।।३६।।

विवरणम्

प्रक्लृप्तयोगासनपूजनादिकामिति कुम्भसंस्कारकूर्चन्यासग्रहणम्। गलन्तिकां वर्धनीम्। प्रकल्पिताङ्गामिति। लिपितत्त्वास्त्रियाङ्गन्यासकथनम्। अमुना प्रपूजयेदिति। अस्त्रेण साङ्गेन सावरणं परिपूज्य निवेद्य प्रसन्नपूजामपि कुर्यादिति भावः। पूजान्ते कुम्भेशे मूलत्रितत्त्वजपो वर्धन्यामस्त्राष्टोत्तरशतजपश्च कार्यः। तदुक्तम् -

"अस्त्रेण शतवारं तु मन्त्रयित्वा तु वर्धनीम्।

इति।।३६।।

ततः करकधारया विहितकुड्यमूलोक्षया
प्रदक्षिणपरिभ्रमं वितनुयादलिन्देऽस्त्रतः।
घटं नयतु पृष्ठतोऽप्यथ पुरार्जितान् सर्षपान्
विकीर्य करकं घटीं विकिरकांश्च पीठे न्यसेत्।।३७।।

विमर्शिनी

ततोऽलिन्दे विहितकुट्यमूलोक्षया विहितं विधीयमानं कुड्यमूलोक्षणं यया तया करकधारयास्त्रतो[1]ऽस्त्रमन्त्रं जपन् प्रदक्षिणपरिभ्रमम् ईशादीशपर्यन्तं प्रदक्षिणक्रमेण परितो भ्रमणं वितनुयात्। पृष्ठतः तत्पृष्ठमार्गेण घटं कुम्भेशं नयतु। अथ पुरार्जितान् प्राङ् मण्डपशोधने गृहीतान् सर्षपान् विकीर्य करकं कर्करीं न्यसेत्। पीठे विकिरकांश्च विकीर्य घटीं कुम्भेशं न्यसेत्।।३७।।

विवरणम्

विहितकुड्यमूलोक्षयेति करकधाराया विशेषणम्। विहिता कृता अलिन्दस्यैव कुड्यमूले उक्षा उक्षणं सेको यया सा तथोक्ता। ततः प्रदक्षिणपरिभ्रममिति। ईशादारभ्य

---

१. 'तो म' ख. पाठः

Shripuram Publications
www.shripuram.org

तदन्तमिति भावः। तदुक्तम् -

"ईशानान्तं परिभ्रम्य तत आरभ्य साधकः।"

इति। घटं नयतु पृष्ठत इति। तदप्युक्तम् - 'घटं तेनैव मार्गेणे'ति। रक्षार्थं वर्धन्याः परिभ्रमणं भूपरिग्रहार्थं कुम्भेशस्येति ज्ञेयम्। गुरुर्वर्धनीं नयतु मूर्तिपः कुम्भेशमपि, विपर्ययेण वेति। पुरार्जितानिति। सिद्धार्थान् विकिरांश्च। रक्षत्वित्यादि पुरोक्तम्। करकं स्वे पीठे सर्षपान् विकीर्य न्यसेत्। कुम्भेशं च स्वे पीठे विकिरान् क्षिप्त्वेति विवेकः।।३७।।

आधारत्रितये यथापुरमदः सम्पूज्य तत्त्वत्रयं
मूलेनात्र विभाव्य देवमणुना साङ्गं समभ्यर्चयेत्।
पूर्णीकृत्य गलन्तिकामपि यजेत् स्वास्त्रेण कृत्वा द्वयो-
र्नैवेद्यं परितोष्य [1]रक्षतु घटौ द्व्येकांशुकावेष्टितौ।।३८।।

विमर्शिनी

आधारत्रितये अदः एतत् तत्त्वत्रयं यथापुरं पूर्ववत् सम्पूज्य अत्र मूलेनाणुना देवं (परि?वि)भाव्य आवाह्य साङ्गं सकलीकृतं तं समभ्यर्चयेत्। गलन्तिकां कर्करीमपि पूर्णीकृत्य स्वास्त्रेण यजेत्। द्वयोरपि नैवेद्यं कृत्वा परितोष्य प्रसन्नपूजां कृत्वा द्व्येकांशुकावेष्टितौ वस्त्रद्वयेन वस्त्रैकेन च वेष्टितौ कुम्भेशकर्करीघटौ रक्षतु।।३८।।

विवरणम्

अत्र अदस्तत्त्वत्रयं यथापुरं सम्पूज्येति। अत्रेति कुम्भेशे। यथापुरमित्यावाहनादिपूर्वकम्। मूलेनाणुना देवं च विभाव्येति पुनः स्वमूलेनावाहनादिकमुक्तम्। पूर्णीकृत्य गलन्तिकामपीति। वर्धनीं पूर्वोक्तैरेव गालितोदकैः सुपूर्णां कृत्वेत्यर्थः। यजेत् स्वास्त्रेणेत्यावाहनादिकमुक्तम्। घटाविति। कुम्भेशं वर्धनीं च। 'पुमान् स्त्रिये'त्येकशेषः। द्व्येकांशुकावेष्टिताविति। कुम्भेशेऽशुकद्वयं वर्धन्यामेकमिति विभागः।।३८।।

[2]स्विष्टात्मा परिमार्जनादिपरिशुद्धेऽस्त्रान्ततारोक्षिते
वाय्वग्न्यम्बुमहीवियद्दहनबीजैस्तत्त्वसंख्योदितैः।

---

१. 'नव्यसवनैरावेष्टय रक्षेद् घटौ।।', २. 'कण्ठे स्वे कृतमार्जनादिपरिशोधे वायुवह्न्यम्बुभूव्योमरानलबीजमन्त्रशरकृत्यावृत्तिमात्रं क्रमात्। आयच्छन्ननिलं विधा'

www.shripuram.org
Shripuram Publications
www.shripuram.org

सन्धार्यासुमसौ विधाय परिशोषादिप्रदाहान्तिमं
तद्वैशेषिकशोधनं परिलिखेत्[1] कुण्डे स्वके स्वोक्तवत्।।३९।।

विमर्शिनी

अग्निजननमाह - स्विष्टात्मेति। असौ गुरुः स्विष्टात्मा सकलीकरणशङ्खपूरणानन्तरं कृतात्माराधनो भूत्वा गणेशमभ्यर्च्य परिमार्जनादिपरिशुद्धे। अत्र मण्डपशोधनेन सह कुण्डानामपि परिशोधनं क्रियते। अपरत्राप्यग्निजनने मुष्ट्यादिभिः स्थलशुद्धिः कार्येत्यभिप्रायः। अस्त्रान्ततारोक्षिते 'ओं हुं फडि'ति मन्त्रेण प्रोक्षिते स्वके (कुण्डे) आचार्यकुण्डे तत्त्वसंख्योदितैः प्रत्येकं पञ्चविंशतिसंख्यया जप्तैः वाय्वग्न्यम्बुमहीवियद्दहनबीजैः यं रं वं लं हं रं इति बीजैः असुं प्राणं सन्धार्य संयम्य परिशोषादिप्रदाहान्तिमं शोषणदहनप्लावनकाठिन्यसुषिरीकरणदहनात्मकं तद्वैशेषिकशोधनं तस्य कुण्डस्य विशेषशोधनं विधाय स्वोक्तवत् स्वस्वोक्तप्रकारेण परिलिखेत्।।३९।।

विवरणम्

अथाग्निजननं प्रस्तौति - स्विष्टात्मेति। देहशुद्ध्याद्यात्माराधनान्तमुक्तम्। गणपतिपूजादि सर्वं सामान्यसिद्धम्। परिमार्जनादिपरिशुद्ध इति कुण्डे स्वक इत्यत्रान्वयः। परिमार्जनादिभिस्सशिखिकुण्डं मण्डपान्तः स्थलमित्युद्दिष्टाभिः शुद्धिभिः परिशोधिते। पूर्वं परिशोधनासम्भवे पुनरिदानीं तत्कार्यमिति चाभिप्रायः। अस्त्रान्ततारः फडन्तप्रणवः। वाय्वादिपञ्चबीजैः शोषणादिपञ्चकं कुण्डशरीरस्यैव। पुनर्वह्निबीजेन प्रदाह आयतनोद्देशस्येत्यवबोद्धव्यम्। तत्त्वसङ्ख्योदितैस्सन्धार्येति। पञ्चविंशतिसङ्ख्याजप्तैः कुम्भकप्राणायामा उक्ताः। असाविति गुरुः। तद्वैशेषिकशोधनमिति। परिमार्जनादिशोधनं सामान्यं, शोषणादि त्विदं विशेषशोधनमिति भावः। यद्वा वैशेषिकं सामान्यभूतविकृतित्वात्। कुण्डशक्तेः शरीरं कुण्डरूपमुच्यते। यदुक्तम्-

"प्राच्यां शिरः समाख्यातं बाहू दक्षिणसौम्ययोः।
उदरं कुण्डमित्युक्तं योनिः पादौ च पश्चिमे।।"

इति। तस्य[2] शोधनं भूतसंहारादिलक्षणम्। तदुक्तम् -

---

१. 'गुरुरिति प्रोत्पादयेत् पावकम्।।' ख. पाठः 'प्रजनयेत्' कुण्डे 'स्वकेऽथानलम्'।। क. पाठः. समनन्तरपद्यव्याख्यरित्या विवरणकारस्याप्येष एव पाठ इति प्रतीयते।, २. 'स्याः' क. ख. पाठः

Shripuram Publications
www.shripuram.org

"कुण्डाभिमानिनीं शक्तिं संहृत्योत्पादयेत् पुनः।
उद्धातावृत्तियोगेन प्राणायामपुरस्सरम्।."

इति। तत्त्वसङ्ख्योदितैरिति। तत्त्वाय तद्भावाय वाय्वग्न्यादिभावापत्तये सङ्ख्याः षोडश तद्द्विगुणतद्द्विगुणरूपा रेचकादिलक्षणाः ताभिरुदितैरिति व्याख्येयम्। कुण्डजीवशक्तिमात्मन्याहृत्य भूतसंहारशोषणादिपञ्चकतज्जीवप्रतिसंक्रमणभूतसर्गायतनोऽदेशप्रदाहप्राणायामं कृत्वा लिपिन्यासं कुर्यात्। स्वके कुण्डे इति। यद्वस्तु तावत् कुण्डं तद्वस्त्वात्मके कुण्डे सम्पन्ने अग्निं प्रजनयेदिति। यत उक्तम्-

"कुण्डस्था वैष्णवी शक्तिः प्रकृतिस्त्रिगुणात्मिका'

इत्यादि। तत्र प्रथमं प्रणवन्यासः।

"व्यापय्य तारतः कुण्डं तदंशान्मेखलात्रये।
गर्तेऽन्तर्बिन्दुनादादीन् व्यापकत्वेन विन्यसेत्।।
सप्तवर्गपदे गर्ते पर्जन्याद्यब्जजावधि।
पदेषु विन्यसेद् विद्वानादिसान्तां च मातृकाम्।।"

अब्जजो ब्रह्मा मध्यपद एव हलक्षाक्ष(र)न्यासः। वक्ष्यति च - 'हलक्षाक्षरं मध्यभाग' इति।

"न्यस्येत् स्वस्वजिनार्णार्णान् प्रागादिषु पदेषु तु।
तावत् सुपश्चिमान्तेषु तारेण व्यापयेत् पुनः।।"

गर्तोद्देशं प्रागादिपश्चिमान्तं चतुर्विंशतिधा विभज्य तेषु पदेषु गायत्र्या वर्णन्यासः।

"गर्तवप्रेऽपि पूर्वादिचतुर्वप्रेषु विन्यसेत्।
षट् षट् पदानि सङ्कल्प्य गायत्र्यर्णान् विभागवित्।।
व्यापय्य जीवतत्त्वेन शेषतत्त्वान्यथ क्रमात्।
प्रागादिपश्चिमान्तेषु पदेषु त्र्यष्टसु न्यसेत्।।
शैवे शिवादितत्त्वानि द्वादश व्यापकात्मना।
विन्यस्य शेषतत्त्वानि प्रागादिषु पदेष्वपि।।
पश्चिमादिपुरोन्तेषु योनौ पञ्चदश स्वरान्।

Shripuram Publications
www.shripuram.org

पदेषु[१] विन्यसेत् गर्ते विसर्गं होमदेशतः।।
शक्त्या व्यापय्य तस्यांशांस्त्रीन्न्यसेन्मेखलास्वथ।।
बिन्द्वादीन् व्यापयेद्गर्ते तदङ्गान्यपि विन्यसेत्।"

इति। तत्तन्न्यासानन्तरं तत्तत्पूजापि कार्येति। प्रागुक्ताधिकसंस्कारेण कुण्डशक्तेः संहारसामर्थ्यं वा साधनीयम्। तदुक्तम्-

"लीयते विश्वमत्रेति कुण्डं तद्विश्वकुण्डनात्'।

इति। यद्वा, होमोद्देशे बिन्दुलक्षणायाः संहारशक्तेः स्फूर्त्त्यर्थमेतत्। तदा त्वमृतबीजेन सर्गशक्तेः स्फूर्त्तिरपि भावनीया। यदप्युक्तम्-

"अग्निरूपेण संहारं सोमरूपेण चोदयम्।
करोति बिन्दुयुग्मस्था' इति।।३९।।

तारेणाजितसुम्भजिद्धरिहरे[२] रेखामुदग्गामिनीं
प्रागग्रे च तदन्तयोर्विलिखतु द्वे ते च तिस्रोऽन्तरा।
तच्छेषेष्वथ तिस्र एव विलिखेत् पाश्चात्यरेखोर्ध्वतो
याम्यादिक्रमतो महेशगुहयोस्ताः स्वास्त्रतः कल्पवित्।।४०।।

विमर्शिनी

कल्पविद् अजितसुम्भजिद्धरिहरे विष्णुदुर्गाशिवनारायणेषु तारेण उदगामिनीं पश्चिमभागे दक्षिणत आरभ्योदगग्रां रेखां विलिखतु, तदन्तयोस्तस्या रेखायाः पार्श्वयोः (प्रागग्रे) द्वे रेखे च, ते अन्तरा तयोरन्तराले दक्षिणत आरभ्य तिस्रश्च। अथ तच्छेषेषु शिवस्कन्दगणपतिशास्तृषु पाश्चात्यरेखोर्ध्वतः पश्चिमरेखावसाने याम्यादिक्रमतस्तिस्र एव विलिखेत्। कल्पविदित्यनेन स्वचरणोक्ता रेखा लिखेद्वेति च सूचितम्। महेशगुहयोस्ता रेखाः स्वास्त्रतो विलिखेत्।।४०।।

विवरणम्

अथानलं प्रजनयेदित्ययमुद्देशः कथमित्याह - तारेणेति। प्रादेशमात्रा इह रेखाः स्युः। तदन्तयोः प्रागग्रे च द्वे इति। रेखे इति शेषः। याम्यादिक्रमत इत्येतदिहापि

---

१. 'षु न्यस्य गर्ते तु वि' घ. पाठः, २. 'अस्त्राणुना विधिवदायतनं विलिख्य भूयः समुक्ष्य सलिलैः सकलं निरस्य। कृत्वा सगन्धकुसुमाक्षतवारिकूर्चैस्तारेण' ख. पाठः

www.shripuram.org

योजनीयम्। ते चान्तरा तिस्र इति। तयोर्मध्ये इत्यर्थः। पाश्चात्यरेखोर्ध्वत इति। रेखामुदग्गामिनीमित्यस्याः प्राग्भाग इत्यर्थः। महेशगुहव्यतिरिक्तेषु तारत एव। कल्पविदिति...।।४०।।

स्कन्देशयोः कवचतो ध्रुवतः परेषु
भूयः समुक्ष्य सलिलैः शकलं निरस्य।
न्यस्येत् सगन्धकुसुमाक्षतवारिकूर्चै[1]-
स्तारेण विष्टरमिहार्हतु योगपीठम्।।४१।।

विमर्शिनी

भूयः स्कन्देशयोः कवचतः, परेषु ध्रुवतश्च सलिलैः समुक्ष्य शकलं निरस्य सगन्धकुसुमाक्षतवारिकूर्चैः गन्धसहितपुष्पाक्षतजलकूर्चैस्तारेण विष्टरमग्नेरुपवेशनयोग्यं पीठं न्यसेत्। इह विष्टरे योगपीठमर्हतु च।।४१।।

विवरणम्

शकलं निरस्येति। नैर्ऋतादिश्यस्त्रेणेति सामान्यावसेयम्। कूर्चपदेन कलशपटलभाविकूर्चग्रहणम्। विष्टरमित्यौचित्याच्छयनीयरूपमित्यवसीयते।।४१।।

श्रीबीजेन प्रकृतिमभिवाह्याजितेऽन्येषु शक्त्या
चेष्ट्वा दीर्घस्वरभिदुरबीजाङ्गसाङ्गीकृतां ताम्।
पुत्रीयन्तीं शुचिमृतुमतीं प्राक्शिरस्कां रतोत्का-
मुत्तानाङ्गीमुदरकुहरीभूतकुण्डां स्मरेच्च।।४२।।

विमर्शिनी

अजिते श्रीबीजेन, अन्येषु शक्त्या भुवनेश्वर्या च प्रकृतिं जगत्कारणभूतां शक्तिमभिवाह्य दीर्घस्वरभिदुरबीजाङ्गसाङ्गीकृतां दीर्घस्वरभेदितेन श्रीबीजेन शक्तिबीजेन वा कृतैरङ्गैः सकलीकृतामिष्ट्वा तां प्रकृतिम् ऋतुमतीं सञ्जातर्तुकालां, शुचिं शुद्धाम्। शुचिशब्द उभयथा योज्यः। शुचिमग्निं पुत्रीयन्तीम् अग्निमात्मनः पुत्रमिच्छन्तीं च, प्राक्छिरस्कां कुण्डस्य प्राग्भागगतशिरोभागयुक्तां पश्चिमगतपादां च, रतोत्कां सुरत

१. 'र्चं तारे' क. पाठः

shripuram publications
www.shripuram.org
www.shripuram.org

उन्मनस्काम्, उत्तानङ्गीम् उत्तानावयवाम्, उदरकुहरीभूतकुण्डाम् उदरकुहरत्वेन कल्पितकुण्डां च स्मरेत्।।४२।।

विवरणम्

शक्त्या चेति। आवाह्येत्यनुकर्षः। दीर्घैः स्वरैर्भिदुरं तद्बीजं श्रां श्रीमित्यादि ह्रां ह्रीमित्याद्यपि लिपितत्त्वन्यासावपीह युक्तौ। तामिष्ट्वेति जलगन्धादिभिस्सपर्योक्ता। पुत्रीयन्तीं शुचिमिति। अग्निमात्मनः पुत्रमिच्छन्तीं, शुचिमिति स्नातालङ्कृतामिति चार्थः। ऋतुमतीमिति। गर्भाधानकालयोगिनीम्। प्राक्छिरस्कामिति। यदुक्तम् - 'प्राच्यां शिरस्समाख्यातम्'। इत्यादि। रतोत्कामिति। वागीश्वरीशक्तिरियम्। वागीश्वरेण सह सम्प्रयोगोन्मना भवतीति भावः। तदा ध्यानार्थमेतावदुक्तम्। स्वात्मनश्च वागीश्वरभावधिया मूलप्राणायामाङ्गन्यासाद्यपि कार्यमिति ज्ञेयम्। स्मरेच्चेत्यनेनैतदपि सूचितम्। वक्ष्यति च - 'विभुवीर्यमयमि'ति। तच्चोक्तम् - 'ध्यात्वात्मानं शिवं देवमि'त्यादि। पाद्यादि दत्त्वा परिपूज्यार्घ्यदानमपि कार्यम्।।४२।।

विप्रावसथ्यं निभृतोपनीतमर्काश्मजं वारणिसम्भवं वा।
हव्यादमादाय निधाय नाभौ क्रव्यादभागं निरृतौ निरस्येत्।।४३।।

विमर्शिनी

विप्रावसथ्यं ब्राह्मणस्य महानसभवम्, अर्काश्मजं सूर्यकान्तातप[1]योगाज्जातं वा, अरणिसम्भवम् अरणिभ्यां मथनात् सम्भूतं वा निभृतोपनीतं गूढोपनीतं हव्यादमग्निमादाय नाभौ निधाय क्रव्यादभागं राक्षसांशं निरृतौ बहिर्निरृतिभागे निरस्येत् त्यजेत्।।४३।।

विवरणम्

विप्रावसथ्यमिति। ब्राह्मणगृहसम्भवम्। निभृतोपनीतमिति। शरावादिपात्रे सुभृतमक्षुब्धतया प्रशान्ततया कृत्वा मूर्त्तिपेनोपाहृतमित्यर्थः। पात्रान्तरेण उपर्याच्छादनमपि कार्यम्। अर्काश्मा सूर्यकान्तम्। हव्यादमादायेति। अग्निं प्रणवेन परिगृह्येत्यर्थः। निधाय नाभाविति। दर्भसंस्तरे कूर्चे वा न्यसनम्। क्रव्यादभागमिति। रक्षसां भागम्। स चाङ्गारमात्रं दर्भोद्योतो वा अस्त्रेण वा तूष्णीं वा निरासः।।४३।।

---

१. 'पाभायो' क. ख. पाठः,

Shripuram Publications
www.shripuram.org

उन्नीय वह्निचितिमात्मनि संविलाप्य
कृत्वा प्रदाहचरमां परिशुद्धिमग्नौ।
प्रत्यर्प्य तत्र चितिमात्मगतां निजेन
बीजेन तारपुटितेन यजेच्च किञ्चित्।।४४।।

विमर्शिनी

वह्निचितिमग्निचैतन्यम् उन्नीयोर्ध्वं नीत्वा स्वात्मनि स्वस्य गुरोरात्मनि योजयित्वा प्राणायामेन संविलाप्याग्नौ प्रदाहचरमां परिशुद्धिं शोषणदहने स्वस्वबीजेन कृत्वा 'ओं पद्माय नमः' इति पूजितपीठे तत्राग्नौ वा आत्मगतां पूर्वं योजितां चितिं चैतन्यकलां प्रत्यर्प्य आवाह्य तारपुटितेन निजेन बीजेन 'ओं रं ओं नमः' इत्यनेन किञ्चिद् यजेच्च।।४४।।

विवरणम्

उन्नीय वह्निचितिमिति। फडन्तप्रणवप्रोक्षणमस्त्रेण, तालत्रयाद्यपि सामान्यसिद्धम्। प्रणवेनैतदुन्नयनमात्मनि संविलापनं च भवति। प्रदाहचरमामिति। शोषणं दहनं च। प्रत्यर्प्येति प्रणवेनैव प्रतिसङ्क्रमणमुक्तम्। निजेन बीजेनेति। यजेच्चेति सम्बन्धः। किञ्चिदिति। अग्नेरुद्वासनं मा भूदिति भावः। विद्वानिति वा पाठः। तारपुटितेन रंबीजेन अग्निशक्त्यावाहनं रां रीमित्याद्यङ्गन्यासोऽपि कार्य इति तदाशयः। यद्वा सोऽप्यग्निः स्वात्मनो वागीश्वरभूतस्य मूलाधारे चिन्तनीय इति। यत उक्तम्-

"ध्यात्वात्मानं शिवं देवं चिद्रूपं कुण्डमध्यगाम्।
रत्यर्थिनीं ऋतुस्नातां ध्यायन्नादाय पावकम्।।"

इत्यादि।।४४।।

उद्बुद्धमुद्धृतपिधानमुदर्चिषं त्रि-
रास्थाय जानुयुगलेन परिभ्रमय्य।
योन्यां ध्रुवेण विभुवीर्यमयं निदध्याद्
गर्भाशयं समुपनीय समेधयेच्च।।४५।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

ततः स्वयं जानुयुगलेनास्थाय जानुयुगलं भुवि स्पृष्टं यथा भवति तथोपविश्य पात्रघट्टनेन उद्बुद्धमुद्धृतपिधानं त्यक्ताच्छादनम् उदर्चिषम् अग्निमायतनोपरिभागे त्रिः परिभ्रमय्य विभुवीर्यमयं देवस्य बीजात्मकं ध्रुवेण प्रकृतेर्योन्यां निदध्यात्। पुनर्गर्भाशयं गर्भपात्रमिन्धनशकलेन समुपनीय समेधयेत् ज्वालयेच्च।।४५।।

विवरणम्

उद्बुद्धमिति। कुण्डगतवागीश्वरीशक्तिसम्प्रयोगमाहात्म्याद् उद्बुद्धं तद्बुद्ध्या पात्रताडनेन उद्बोधितम्। उदर्चिषमिति। अग्निं जानुयुगलेनास्थाय त्रिः परिभ्रमय्येत्यन्वयः। वीर्यमथनधियैतत् परिभ्रमणम्। ध्रुवेणेत्युद्बोधने परिभ्रमणे च सम्बन्धनीयम्। विभुवीर्यमयमिति। विभोर्यतः सा शक्तिः पुत्रीयन्ती तस्य शुक्लं वीर्यमयमित्यर्थः। अत एवोद्बोधपरिभ्रमणयोरुक्तप्रतिपत्तिलाभः। विभुवीर्यमयमित्यभिधानेन वागीश्वरस्य पृथग्भावनापक्षोऽपि सूचितः। गर्भाशयमित्यग्न्यायतनमध्यमित्यर्थः। समेधनं ध्रुवेणैव प्रज्वलनम्। तदा च वागीश्वरभावोपसंहारेण प्रकृतभावभावनया मन्त्रप्राणायामाद्यपि कार्यमिति ज्ञेयम्।।४५।।

स्वस्वोक्तवत् परिसमूहपरिस्तराद्यं
सर्पिः स्रुवप्रभृतिसंस्करणं च कृत्वा।
कल्याणरेतसममुं परिभू[१]ष्य गर्भा-
धानादिसंस्कृतिमथ क्रमशोऽस्य कुर्यात्।।४६।।

विमर्शिनी

स्वस्वोक्तवत् स्वस्वगृह्योक्तक्रमेण परिसमूहपरिस्तराद्यं परिसमूहनपरिस्तरणपर्युक्षणाद्यं सर्पिः स्रुवप्रभृतिसंस्करणमाज्यसंस्कारादिकं[२] कृत्वा कल्याणरेतसमग्निं परिभूष्य गन्धपुष्पादिभिरलङ्कृत्य अथास्याग्नेः गर्भाधानादिसंस्कृतिं क्रमशः कुर्यात्।।४६।।

विवरणम्

स्वस्वोक्तवदिति। स्वस्वकल्पोक्तमेव स्वस्वोक्तं भवतीत्येवमभिधानम्। परिसमूहपरिस्तराद्यमिति पर्युक्षणादिग्रहणम्। सर्पिःस्रुवप्रभृतिसंस्करणं चेति स्रुगादिग्रहणम्।

---

१. 'त्र' ग. पाठः, २. 'कर्म कृ' ख. पाठः

Shripuram Publications
www.shripuram.org

महास्रुचा हि पूर्णाहुतिरिष्यते; तदसम्भवे तु जुह्वेति। कल्याणरेतसममुं परिभूष्येति। गन्धपुष्पाभ्यामिममग्निमलङ्कृत्येत्यर्थः।।४६।।

तारेण प्रसमर्च्य कर्म करणीयं कल्पयित्वा धिया
हुत्वैकां समिधं घृतं प्रजुहुयात् स्वोक्ताणुनात्राष्टशः।
तिष्ठन् सस्रुवया स्रुचा चतुरवत्ताज्याढ्यया होमयेत्
पूर्णां कर्म कृतं स्मरेत् तदधुना वा स्यात्[1] ध्रुवेणार्चनम्।। ४७।।

विमर्शिनी

तत्परिपाटीमाह - तारेणेति। पूर्वं तारेण प्रसमर्च्य करणीयं कर्म धिया कल्पयित्वा 'गर्भाधानं करिष्य' इत्यादिकमुपांशूच्चार्य एकां समिधममन्त्रकं हुत्वा अत्र अग्नौ स्वोक्ताणुना स्वस्वोक्तमन्त्रेणाष्टशो घृतं प्रजुहुयात्। चतुरवत्ताज्याढ्यया स्रुचि स्रुवेण चतुष्कृत्वः आज्यमवदाय पूरणं कृत्वा सस्रुवया स्रुवसहितया तया स्रुचा स्वयं तिष्ठन् पूर्णां होमयेत्। ततस्तत्कर्म कृतं स्मरेत् 'गर्भाधानं कृतमि'त्याद्युपांशूच्चरेत्। तत् ध्रुवेणार्चनमधुना वा स्यात्, कर्मणः पूर्वमर्चनमिति केचित्, कर्मण उपरीति केचिदित्यर्थः।।४७।।

विवरणम्

गर्भाधानादिसंस्कृतिं विवृणोति - तारेण प्रसमर्च्येति। करणीयं कर्म धिया कल्पयित्वेति। 'ओं गर्भाधानं करिष्ये' इति मनसोच्चारणमेतत्। चतुरवत्ताज्याढ्यया सस्रुवया स्रुचा तिष्ठन् पूर्णां स्वोक्ताणुना होमयेदित्यनुषङ्गेण योज्यम्। स्रुवेण चतुर्वारं महास्रुचि घृतमवदाय तिष्ठन् पूरयेत्। अत एवाढ्यग्रहणम्। पुनः स्रुवं तदुपरि सम्पुटं निधाय नाभिसंलग्नतया कृत्वा वौषडन्तेन तन्मन्त्रेण पूर्णाहुतिमच्छिन्नधारया विदध्याद् इत्येवं तत्प्रकारोऽप्यनेन सूचितः। कर्म कृतं स्मरेत्तदिति। 'ओं गर्भाधानं कृतमि'ति। एवं पुंसवनादिष्वपि बोद्धव्यम्। अधुना वा स्याद् ध्रुवेणार्चनमिति। तारेण पूजा प्रक्रमे तावदुक्ता, सेदानीं परिसमाप्तौ वा स्यादित्यर्थः।।४७।।

ईशे षोडश सेकपुंसवनसीमन्तोन्नया जातक-
र्माख्या निष्क्रमभुक्तिचौलमुपनीतिश्च व्रतानि क्रियाः।
स्नानोद्वाहवितानवह्निकरणं शेषेष्वनिष्क्रान्तयः
सन्त्वष्टोपनयान्तिमा महिषहन्त्र्यां सप्त चौलान्तिमाः।।४८।।

---

१. 'स्याद् ध्रुवे' क. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

कर्माण्याह - ईश इति। ईशे सेकपुंसवनसीमन्तोन्नयाः सेको गर्भाधानं, पुंसवनं, सीमन्तोन्नयश्च, जातकर्म, आख्या नामकरणं, निष्क्रमभुक्तिचौलं निष्क्रामणमन्नप्राशनं चौलं च, उपनीतिरुपनयनं, व्रतानि माहानाम्न्यमहाव्रतौपनिषदगोदानानि। चरणवशादन्यथात्वेऽपि सर्वेषां चत्वार्येव व्रतानि ग्राह्याणि। स्नानोद्वाहवितानवह्निकरणं स्नानं समावर्तनं, उद्वाहो विवाहः, वितानवह्निकरणमग्न्याधानम् इति षोडश क्रियाः सन्तु, शेषेषु देवेष्वनिष्क्रान्तयः निष्क्रामहीनाः उपनयान्तिमा अष्टौ। महिषहन्त्र्यामनिष्क्रान्तयश्चौलान्तिमाः सप्त[१]।।४८।।

विवरणम्

ईशे षोडशेति। क्रियाः सन्त्विति सम्बन्धः। सेको गर्भाधानम्। सीमन्तोन्नयः सीमन्तोन्नयम्। आख्या नामकरणम्। निष्क्रम उपनिष्क्रामणम्। भुक्तिरन्नप्राशनम्। चौलं चौळकर्म। उपनीतिरुपनयनम्। व्रतानीति। सर्वचरणेष्वपि चत्वार्येव ग्राह्याणि। यथा माहानाम्निकं माहाव्रतमौपनिषदं गोदानमित्यादि। स्नानं समावर्तनं, उद्वाहो विवाहकर्म, वितानवह्निकरणं अग्न्याधानम्।।४८।।

[२]कुर्यात् सद्यादिपञ्चाननशिवनृशिवब्रह्मपङ्क्त्यर्णनादै-
रीशे[३] श्रीशार्यदुर्गास्वपि मनुलिपिभिः स्वाङ्गबीजैर्गणेशे।
संस्कारानन्त्यतस्त्रीन् स्मरमुरभिदि भूरादिभिः सत्यतो द्वौ
श्रीशे वाङ्गैः षडास्ये षडणुमनुयुजार्येऽपि षण्मूलतारैः।।४९।।

विमर्शिनी

क्रियाणां होममन्त्रानाह - कुर्यादिति। ईशे सद्यादिपञ्चाननशिवनृशिवब्रह्मपङ्क्त्यर्णनादैः सद्यादिपञ्च 'सद्योजातं प्रपद्यामी'त्यादिपञ्चब्रह्माणि, आननं तत्पुरुषः, शिव ईशानः, नृशब्देन तत्पुरुष उक्तः, पुनरपि शिव ईशान एव, ब्रह्मेति सद्योजातादीशानान्तानि पञ्च ब्रह्माणि, पङ्क्त्यर्णं व्योमव्यापि दशाक्षरं, नादः प्रासादः, एतैः संस्कारान् कुर्यात्। श्रीशार्यदुर्गास्वपि मनुलिपिभिर्मूलमन्त्राक्षरैः, गणेशे स्वाङ्गबीजैरन्त्यतः अस्त्रेण त्रीनपि,

---

१. 'प्त क्रियाः सन्तु।। तासां क्रि' ख. पाठः, २. 'शर्वे स', ३. 'रार्ये षण्मूलतारैश्चरतु षडणुमूलद्वयैर्बाहुलेये। भूराद्यैः सत्यतो द्वौ स्मरमुरदमने स्वाङ्गबीजैर्गणेशे संस्कारानन्त्यतस्त्रीन् हरिमहिषजितोर्मूलवर्णैश्च वह्नेः।' ख. पाठः

www.shripuram.org

स्मरमुराभिदिशिवनारायणे भूरादिभिः सप्तव्याहृतिभिः, तत्र सत्यतो द्वावपि, श्रीशे अङ्गैः अष्टाङ्गैर्वा, षडास्ये षडणुमनुयुजा षण्मन्त्रैर्मूलमन्त्राभ्यां च। आर्येऽपीत्यपिशब्दो विकल्पार्थः, पूर्वं मूलार्णैरुक्तत्वात्। तत्र षण्मूलतारैः षण्मन्त्रमूलमन्त्रप्रणवैः संस्कारान् कुर्यात्। सर्वत्र होमे मन्त्राणां स्वाहान्तत्वमवगन्तव्यं, मन्त्राणां बीजानां व्याहृतीनां विभक्तिरहितत्वं च, पीठपरिवारादीनाममन्त्राणां स्वाहान्तविभक्तिसहितत्वं च।।४९।।

विवरणम्

आननं तत्पुरुषः, शिव ईशानः, नृशब्देन तत्पुरुष उक्तः, ब्रह्माणि सद्योजातादीनि, पङ्क्त्यर्णो व्योमव्यापि दशाक्षरम्, नादः प्रासादः। मनुलिपिभिरिति। स्वस्वाष्टाक्षरमनोरष्टभिरक्षरैः। तानि च प्रणवरुद्धानि स्युः। गणेशे स्वाङ्गबीजैरन्त्यतस्त्रीनिति। प्रणवरुद्धैः गांगीमित्यादिषड्भिरङ्गबीजैरन्नप्राशनान्तानि पुनरन्त्येनैव चौळमुपनयनं चेत्यर्थः। भूरादिभिरिति प्रणवादित्वमिष्यते। श्रीशे वाङ्गैरित्यष्टाङ्गविकल्पः। षडास्ये षडणुमनुयुजा वेति। 'ओं सनत्कुमाराय स्वाहा' इत्यादिषण्मन्त्रैर्मूलेनोपचारमनुना चेत्यर्थः। षण्मूलतारैरिति। रेवन्तादिषण्मन्त्रैर्मूलेन च प्रणवेन च। अयमपि विकल्प एव।।४९।।

पूर्णेषु कर्मसु समर्चितयोगपीठे-
ऽत्रावाह्य मूलमनुना लिपितत्त्वमन्त्रान्।
विन्यस्य तं सकलितं[1] परिदीप्तसप्त-
जिह्वादिकं प्रयजतामनुसन्दधानः।।५०।।

विमर्शिनी

क्रियाशेषमाह - पूर्णेष्विति। एवं पूर्णेषु कर्मसु सत्सु समर्चितयोगपीठेऽत्राग्नौ मूलमनुनावाह्य लिपितत्त्वमन्त्रान् विन्यस्य सकलीकृतं[2] तं परिदीप्तसप्तजिह्वादिकं परितो दीप्ताः सप्त जिह्वा ज्वालाभेदा यस्य तम्। एतेन पक्षान्तरे जिह्वाङ्गमूर्तिन्यासादिकं सूचितम्। एवंभूतं च तमनुसंदधानः ध्यायन् प्रयजताम्।।५०।।

विवरणम्

पूर्णेषु कर्मस्विति। परिसमापितेषु संस्कारेषु प्राग्जिह्वादिन्यासासम्भवे तैरपिकार्ये होमः। समर्चितयोगपीठ इति। 'प्राग् इहार्हतु योगपीठमि'ति यदुक्तं तदनुवादः। यद्वाधुनापि

१. 'कल्प्य देवं संपूजयेत् सुपरिवारवृतं जलाद्यैः।। ता' ख. पाठः, २. 'लितं' घ. पाठः

Shripuram Publications
www.shripuram.org

पीठपूजा कार्येति विधानं प्रागुक्तपीठं शक्तेरेव तद्गताग्नावेवेदं देवस्य पीठमिति च भेदः। जातकर्मणि कृते सा शक्तिः कुण्डशक्तिरूपेणैव विभावनीयेति। तं सकलितमिति। एवं सकलितम्। यद्वाङ्गायुधादिन्यासाभिप्रायमेतत्। परिदीप्तसप्तजिह्वादिकमिति। तं अनुसन्दधान इति सम्बध्यते। जिह्वादीनामनुसन्धानमात्रमेव। यद्वा, अग्न्याधानानन्तरं न्यासोऽपि कार्यः। तत्र प्रथमं लिपिन्यासं तत्त्वन्यासं च कृत्वा पुनर्जिह्वादीनां न्यासः। तदुक्तम् -

"सलिङ्गगुदमूर्धास्यनासानेत्रेषु च क्रमात्।
सर्वाङ्गेषु च विन्यस्येत् सप्तजिह्वा हविर्भुजः।।
हिरण्या गगना रक्ता कृष्णा चैव तु सुप्रभा।
बहुरूपातिरक्ता च जिह्वाः सप्तेति सात्त्विकाः।।" इति।

आदिशब्देन मूर्त्यङ्गग्रहणम्। तदप्युक्तं-

मूर्धांसपार्श्वकट्यन्धुकटिपार्श्वांसकेषु च।
जातवेदाः सप्तजिह्वो हव्यवाहन एव च।।
अश्वोदरजसंज्ञश्च स वैश्वानर एव च।
कौमारतेजाश्च तथा विश्वदेवमुखाह्वयौ।।
स्युरष्टमूर्तयो वह्नेरग्नयेपदपूर्विकाः।।" इति।।

'ओमग्नये जातवेदसे नमः' इत्यादि। 'विश्वदेवमुखाह्वयावि'ति। ओमग्नये विश्वमुखाय नमः'। 'ओमग्नये देवमुखाय नमः'। इति मूर्तिन्यासः। पुनरङ्गन्यासः-

"सहस्रार्चिः स्वस्तिपूर्ण उत्तिष्ठपुरुषस्तथा।
धूमव्यापी सप्तजिह्वो धनुर्धर इतीरिताः।।" इति।।

'ओं सहस्रार्चिषे हृदयाय नमः' इत्यादि। परिदीप्तसप्तजिह्वादिकमित्यनेनैव अग्नावावाहितस्य देवस्य तेनैवाग्निमूर्तिना सह एकीभावभावनापि प्रणवेन सूचिता। ततश्चैतदपि लभ्यते। प्राग्जिह्वाङ्गमूर्तिन्यासाकरण इदानीं तदपि कार्यमिति। प्रयजतामिति विग्रहपूजावरणपूजा चोक्ता।।५०।।

Shripuram Publications
www.shripuram.org

तारव्याहृतिभिः[1] स्वपीठमनुभिस्तारोपचारस्वमू-
लाङ्गैरावरणाणुभिश्च सकृदावृत्त्या घृतं मूलतः।
पूर्णान्ते प्रजुहोतु भूःप्रभृतिताराख्यैः समाप्यार्च्य तं
रक्षेन्निष्कलितं ततो[2]ऽत्र *परिषेकान्तं विधिं चा[3]चरेत्॥५१॥

विमर्शिनी

तारव्याहृतिभिः तारेण व्याहृतिभिश्च स्वपीठमनुभिः स्वस्वपीठमन्त्रैः तारोपचारस्वमूलाङ्गैरावरणाणुभिः परिवारमन्त्रैश्च सकृद् मूलत आवृत्त्या अष्टाशतमष्टविंशतिवारमष्टवारं वा (घृतं) जुहोतु। पूर्णान्ते भूःप्रभृतिताराख्यैर्व्याहृतिभिः प्रणवैश्च जुहोतु। होमं समाप्यार्च्य प्रसन्नपूजां कृत्वा निष्कलितं तं रक्षेत्। ततोऽत्र परिषेकान्तं विधिं चाचरेत्॥५१॥

विवरणम्

स्वपीठमनुभिरिति। सर्वत्र नतिस्थाने स्वाहाकारः। तारोपचारस्वमूलाङ्गैरिति। सर्वैरपि न्यस्तमन्त्रैर्होमः सम्भववशादिष्यते। अङ्गग्रहणमायुधोपलक्षणम्। अत्र मूलाक्षराणां तारपुटितत्वम्। अङ्गानां नमोवषडाद्यनन्तरं स्वाहाकारस्त्वसौ शिरस एवेति ज्ञेयम्। आवरणाणुभिश्चेति। नेह पूजायामिवावरणसङ्कोचनमित्यर्थाद् गम्यते। सकृदिति। प्रणवव्याहृत्यादिनिर्माल्यधारिपर्यन्तमस्त्रैस्सकृत् सकृदित्यर्थः। आवृत्त्या मूलत इति। 'सर्वत्राष्टावष्टाविंशतिरावृत्तिरष्टशतमथवे'ति। पूर्णान्ते प्रजुहोत्विति। मूलत आवृत्त्येत्यत्रापि सम्बध्यते। भूःप्रभृतिताराख्यैरिति। सकृदित्यनुषङ्गः। ब्रह्मार्पणेनापि हुतमिष्यते। समाप्येति संस्रावाभिप्रायम्। आर्च्येति प्रसन्नपूजोक्ता। निष्कळितं रक्षेदिति लयाङ्गन्यासतालत्रयादिकमुक्तम्। पर्युक्षणान्तं विधिमिति। परिसमूहपर्युक्षणगन्धपुष्पाराधनपर्युक्षणान्युक्तानि। ततः स्वात्मन्यपि लयाङ्गन्यासादि कुर्यादिति।

"मण्डपाङ्गतयामुष्मिन् जनिते जातवेदसि।
कुम्भेशभ्रमणं कुर्यादिति केचित् प्रचक्षते॥

---

१. 'पीठमूलपरिवारैः स्वैर्जुहोत्वेकशः सर्पिः साष्टशतं स्वमूलमनुना पूर्णान्वितं मन्त्रवित्। भूरादिप्रणवैः सकृत् सकृदथाराध्य प्रसाद्य प्रभुं र', २. 'ततः परिसमूहाद्यं वि' ख. पाठः, ३. 'प्रा' क. पाठः

Shripuram Publications
www.shripuram.org

---

* तनुयात् पर्युक्षणान्तं विधिम्' इति विवरणपाठः।

शक्त्या मूलेन वा हुत्वा जनितागनौ विशेषवित्।
सम्पातं मण्डपे वेद्यामर्पयेदिति केचन।।" ।।५१।।

अथ सम्मृष्टलिप्तायां वेद्यां दक्षिणतो गुरुः।
शय्याक्षेत्रं प्रकुर्वीत मूलप्रासादसम्मुखम्।।५२।।

विमर्शिनी

शय्याकल्पनादिकमाह - अथेति। अथ कुम्भेशपरिभ्रमणाग्निजननयोरनन्तरं गुरुः स्वयं संमृष्टलिप्तायां विशेषतश्च कृतमार्जनानुलेपायां वेद्यां दक्षिणतो दक्षिणार्धे शय्याक्षेत्रं शय्यायाः स्थानकल्पनं मूलप्रासादसंमुखं यथा भवति तथा प्रकुर्वीत।।५२।।

विवरणम्

अथ प्राग्जलेऽधिवासितस्य बिम्बस्येह ध्यानाधिवासकृते शय्यापूजामाह - अथ संमृष्टलिप्तायामिति। प्राग्विकीर्णमक्षतादिकं विकिरादिकं वा मुष्ट्या सम्मार्ज्य गन्धतोयेन सम्प्रोक्ष्य वेदितलमालिप्य तत्रेत्यर्थः। लौकिकमेवैतदुभयं मन्तव्यम्। दक्षिणत इति। मध्यसूत्रादिति भावः। तत्रापि प्राग्द्वारे प्रासादे किञ्चित् प्राङ्नीत्वा प्रत्यग्द्वारे किञ्चित् प्रत्यङ्नीत्वा शय्या कल्पनीया। मूलप्रासादसम्मुखमिति। प्राग्द्वारे प्राक्शिरस्कं प्रत्यग्द्वारे प्रत्यक्छिरस्कम् इत्यभिप्रायः। स्कन्दे त्वन्यथा वक्ष्यति 'तत्पूर्वतः शय्यामि'ति।।५२।।

कृत्वा स्वस्तिकमत्र धान्यनिचयं द्रोणाष्टकाद्युन्मितं
मूलेनामलतण्डुलादिसहितं क्षिप्त्वा कुशाग्रोत्तरम्।
तत्रौर्णेयकतूलसंभृतपटीपट्टादिभिः कल्पितां
शय्यां शार्ङ्गिणि संस्तृणातु मिहिरार्णेनान्यतो मूलतः।।५३।।

विमर्शिनी

महत् स्वस्तिकं कृत्वात्र द्रोणाष्टकाद्युन्मितं धान्यनिचयं व्रीहिपुञ्जम् अमलतण्डुलादिसहितम्। आदिशब्देन सिद्धार्थो गृह्यते। कुशाग्रोत्तरं यथा भवति तथा मूलेन क्षिप्त्वा तत्र[१] और्णेयकतूलसंभृतपटीपट्टादिभिः और्णेयकः कम्बलः तूलसंभृतपटी तूलैरन्तर्गृहीता पटी (കിടക്ക)। पट्टादीत्यादिशब्देन इन्द्रगोपादयः पट्टविशेषा गृह्यन्ते। तैः कल्पितां

१. 'त्र पूर्वे औ' ख. पाठः

Shripuram Publications
www.shripuram.org

शय्यां शार्ङ्गिणि मिहिरार्णेन द्वादशाक्षरेण, अन्यतोऽन्यदेवेषु मूलेन च संस्तृणातु कल्पयेत्।।५३।।

विवरणम्

कृत्वा स्वस्तिकमिति विथीस्वस्तिकमभिप्रेतम्। यथोक्तम्-

"प्रागग्रसूत्राण्युदगग्रसूत्राण्यपि क्रमादत्र षडष्ट कृत्वा।
त्र्येकैः पदैः स्वस्तिकमादधीत चतुर्दिशास्वन्यपदैश्च वीथीम्।" इति।।

अत्र मूलेन धान्यनिचयं क्षिप्त्वेति व्रीह्यभिप्रायम्। द्रोणाष्टकाद्युन्मितमिति। द्रोणं मानमुक्तम्।

"माषः शाणस्तलं मुष्टिरञ्जलिः प्रस्थ आढकः।
द्रोणो गोणी च खारी च क्रमादेतच्चतुर्गुणम्।।" इति।।

अमलतण्डुलादिसहितमिति।

"धान्येषु वा शालिषु वा सतण्डुले-
ष्वेतेषु वा सार्धतिलेषु वैषु।
ससर्षपेष्वेषु करोतु शय्यां
तिलोत्तरेष्वेष्वथवा मनस्वी।।" इति।।

तत्र शय्यां संस्तृणात्विति सम्बन्धः। और्णेयकं कम्बलं, तूलैः कार्पासादिभिः सम्भृतान्तः पूरिता पटी वस्त्रं, पट्टं क्षौमादिकम्। आदिशब्देन वर्णविचित्रपट्टादिग्रहणम्। एतैः। कल्पितामिति। खट्वायामायतफलके आयतपीठमात्रेऽपि समानमेतत्। शार्ङ्गिणी मिहिरार्णेनेति। द्वादशाक्षरेण।।५३।।

परार्ध्यवासोविहितोत्तरच्छदे
शिरोपधानादिमतीष्टविष्टरे।
यजेत *तत्[1]पीठदृढाभिमानिनीं
स्वकीयशक्तिं निजबीजविद्यया।।५४।।

विमर्शिनी

परार्ध्यवासोविहितोत्तरच्छदे परार्ध्यैः श्रेष्ठैर्वासोभिर्विहितमुत्तरच्छदमुपरिगतवस्त्रं

---

१. 'स्मिञ्छयने समाहितः स्व' क. ग. पाठः

* 'तस्मिञ्छयने समाहितः' इति विवरणरीत्या पाठः

www.shripuram.org

यस्मिंस्तस्मिन्। शिरोपधानादिमतीत्यादिशब्देन पादोपधानकपोलस्थलादिकं गृह्यते। इष्टविष्टरे कृतपीठार्चने तत्र तत्पीठदृढाभिमानिनीं तत्पीठरूपिण्यां शय्यायां स्थिराधिष्ठात्रीं रमोमाद्यां निजबीजविद्यया विष्णौ श्रीबीजेन अन्यत्र भुवनेश्वर्या चावाह्य यजेत।।५४।।

विवरणम्

पराध्र्यवासोविहितोत्तरच्छद इति। पराध्र्यमर्धतो महत्। द्वे त्विह उपर्यास्तरणे स्याताम्। शिरोपधानादिमतीति। कपोलस्थलद्वयं पादगड्डुकमित्येतद् आदिशब्देनोक्तम्। इष्टविष्टर इति। समुचितविष्टरन्यासः पीठपूजा चोक्ता। यजेतेति। आवाहनादिपूर्वकं पूजनमभिप्रेतम्। समाहित इति प्रतिपत्त्यभिप्रायम्। विधानविदिति वा पाठः। तेनात्मनः सकळीकरणादिकं गुरुगणपतिपूजापूर्वकं शय्यायामस्त्रप्रोक्षणतालत्रयादिकं शोषणादिकं शक्तिधारणेत्येतत् सर्वमुक्तम्। स्वकीयशक्तिमिति। विष्णौ लक्ष्मीं, अन्येषु मूलप्रकृतिम्। निजबीजविद्ययेति। श्रीबीजेन भुवनेश्वर्या वेत्यर्थः। यद्वा स्वकीयशक्तिमिति,

"विष्णौ श्रीः स्यात्, शिव उमा श्र्युमा हरिहरे गुहे।
देवयान्यथ दुर्गायां प्रकृतिश्शक्तिरिष्यते।।"
प्रभा शास्तरि हेरम्बे विभूतिर्भुवनेश्वरी।
श्रीहृल्लेखापि बीजं स्वं स्वा वा विद्या प्रभादिषु"

इति। प्रभाविभूतिदेवयानीषु तासामेव विद्या वेत्यर्थ इति।।५४।।

आपोहीत्यणुभिः स्मरद्विषि शिरोदेशे कुमारे तथा-
पोदेवीरिति मूलतस्तदितरेष्वार्येऽथवैश्यां दिशि।
निद्राकुम्भमथाभिपूर्य विधिवद् गन्धाम्भसा पूजये-
च्छय्यान्ते परितोऽष्टदिक्षु मनुविद् विद्येशकुम्भानपि।।५५।।

विमर्शिनी

अथ मनुवित् मन्त्रविशेषज्ञो गुरुः सर्वदेवेषु शय्यायाः शिरोदेशे आर्येऽथवैश्यां दिशि स्मरद्विषि आपोहीत्यणुभिः आपोहिष्ठादिमन्त्रैः, तथा कुमारे 'आपो देवीः' इति मन्त्रेण, तदितरेषु मूलतश्च (निद्राकुम्भं) गन्धाम्भसाभिपूर्य विधिवत् कलातत्त्वावाहनादिसंयुतं पूजयेत्। शय्यान्ते शय्यासमीपे परितोऽष्टदिक्षु विद्येशकुम्भानप्यभिपूर्य पूजयेत्।।५५।।

Shripuram Publications
www.shripuram.org

विवरणम्

शिरोदेश इति। शय्यायामेव। न बहिरिति भावः। निद्राकुम्भमथाभिपूर्येति। पूजयेदित्युपरि सम्बन्धः। आर्येऽथवैश्यां दिशीति। शास्तरि शिरोदेशे वेशदिशि वा तत्र प्राक्छिरस्के बिम्बे शिरसो दक्षिणाभ्याशे भवति। प्रत्यक्छिरस्के उत्तराभ्याशे तु गन्धाम्भसा विधिवदभिपूर्य पूजयेदित्यन्वयः। विधिवदिति। कुम्भसंस्कारतदावाहनकूर्चन्यास-हेमरत्नाक्षतद्रव्यन्यासमानसपूरणाद्युक्तानि। लिपिपङ्कजपूजामूर्त्तिद्वयतत्त्वावाहनादिकमपि कार्यम्। वक्ष्यति च-

"निद्राघटेन च तथाखिलतत्त्वमूलैः"।

इति। शय्यान्त इति। शय्याया बहिर्भाग एवेत्यर्थः। स्वस्तिकेषु व्रीहिभिः पीठं विधाय तेषु विद्येश्वरकलशपूजा कार्या। मनुविदिति। विद्येश्वरमन्त्रतदङ्गाभिज्ञत्व-मुक्तम्।।५५।।

विष्णौ विष्णुमुखाः समूललिपयो दिक्कोणकास्त्रीक्षणे-
ऽनन्ताद्या अपि[1] ते द्वये शिवहरौ गोप्त्रादयः शास्तरि।
पूज्यास्तेषु घटेषु भाविपरिवारा मूर्तयः शक्तय-
श्चान्येषु त्रिषु मूलमेव चतसृष्वाशासु वा षण्मुखे।।५६।।

विमर्शिनी

विष्णौ तेषु घटेषु समूललिपयः मूलमन्त्राक्षरैः क्रमाद् युक्ता विष्णुमुखा विष्णुमधुसूदनाद्याश्च[2]क्रपूजायां वक्ष्यमाणाः पूर्वादिदिक्कोणगाः पूज्याः। त्रीक्षणे अनन्ताद्याः अनन्तसूक्ष्माद्याः पूजायां वक्ष्यमाणाः। शिवहरौ ते द्वयेऽपि 'अनन्ताय विष्ण्वात्मने नमः' इत्याद्याः। शास्तरि गोप्त्रादयः गोप्तृपिङ्गलाक्षादयो मण्डपसंस्कार उक्ताः। अन्येषु त्रिषु दुर्गास्कन्दगणेशेषु मूर्तयः शक्तयश्च भाविपरिवाराः पूजापटले वक्ष्यमाणाः। तत्र दुर्गायां जयाद्याः शक्तयः, स्कन्दे सनत्कुमाराद्या मूर्तयः, गणेशे गणञ्जयाद्या मूर्तयः पूज्याः। षण्मुखे चतसृष्वाशासु मूलमेव वा मन्त्रः।।५६।।

विवरणम्

विष्णौ विष्णुमुखा इति। चक्राब्जपूजायां वक्ष्यमाणा इति भावः। समूललिपय

१. 'द्वितयेऽपि ते शि' इति मूलकोशपाठो विवरणपाठश्च।, २. 'श्च पू' ख. पाठः

www.shripuram.org

इति। अष्टाक्षरवर्णैः प्रणवपुटितैः[1] आदौ युताः स्वस्वपदैरिह पञ्चाङ्गानि। दिक्कोणगा इति। ... ... त्रीक्षणेऽनन्ताद्या इति। एषः[2] प्रासादः योगः। ह्रांह्रीमादियुतैः स्वनामभिरिह षडङ्गानि। प्रासादयोगे प्रणवेन वा अ आ इत्यादिस्वरद्वन्द्वगतेन स्वनाम्ना वाङ्गानि। यद्वा समूललिपय इति ... मूललिपिरिह प्रासाद एव। द्वितयेऽपि ते शिवहराविति। भिन्नासंभिन्ना वा स्युरिति भावः। भाविपरिवारा इति। स्कन्दे सनत्कुमारादयः। गणपतौ गणञ्जयादयः। ते चौजस्वरयुताः। एता मूर्तयः। दुर्गायां जयाद्याः शक्तयः। सर्वेषां प्रणवेन वा प्रागुक्तवद् द्विस्वरयोगेन वा षडङ्गानि। एतत् सर्वमपि मनुविदित्येव सूचितम्। षण्मुखे चतसृष्वाशासु मूलमेव वेति पक्षभेद उक्तः। स्वात्मनो व्यूहरूपमेतदिति च बोद्धव्यम्।।५६।।

मध्येवेदि विनिर्मिते रसदले कौमारके मण्डले
कौमारं कलशं प्रपूर्य विधिवत् संपूज्य तत्पूर्वतः।
शय्यां दक्षिणसौम्यदिक्कृतसमायामां गुहे कल्पयेत्
स्वोद्यत्स्वापघटादिकामभिदधे कौमारकुम्भार्चनम्।।५७।।

विमर्शिनी

कुमारे विशेषमाह - मध्येवेदीति। गुहे मध्येवेदि वेदिमध्ये रसदले षड्दले विनिर्मिते द्वादशपटले वक्ष्यमाणविधिना संपादिते कौमारके मण्डले कौमारं कुमारदेवत्यं कलशं विधिवत् प्रपूर्य संपूज्य च तत्पूर्वतः तस्य पूर्वभागे दक्षिणसौम्यदिक्कृतसमायामां दक्षिणोत्तरदीर्घां स्वोद्यत्स्वापघटादिकां स्वस्वस्थानस्थितनिद्राकलशविद्येश्वरकलशयुक्तां शय्यां कल्पयेत्। कौमारकुम्भार्चनमभिदधे वच्मि।।५७।।

विवरणम्

अथ स्कन्द एवापरं भेदमभिधत्ते - मध्येवेदीति। 'पारे मध्ये षष्ठ्या वे'ति समासः। प्रपूर्य विधिवदिति पीठपूजाकुम्भसंस्कारादिकमुक्तम्। सम्पूज्य तत्पूर्वत इति स्कन्दे मण्डलपूजापूर्वमेव शय्यापूजेत्युक्तम्। स्वोद्यत्स्वापघटादिकामिति। शय्यायामेव शिरोदेशे निद्राकलशं बहिः स्वस्तिकेषु विद्येश्वरकलशांश्च पूजयेदिति भावः।।५७।।

---

१. 'भ', २. 'षां' घ. पाठः

Shripuram Publications
www.shripuram.org

पीठान्ते ब्रह्माणं सभद्रकालीगणेशविष्णुं[1] च।
ईश्वरशास्तारावपि दलषट्के हरिदिगादि समभियजेत्॥५८॥

विमर्शिनी

तत्पूजाविधिमाह - पीठान्त इति। सामान्यस्कन्दपीठपूजानन्तरं दलषट्के हरिदिगादि पूर्वदिग्दलमारभ्य ब्रह्माणं सभद्रकालीगणेशविष्णुं भद्रकालीं गणेशं विष्णुं च ईश्वरशास्तारावपि स्वस्वनाममन्त्रैः 'ब्रह्मणे नम' इत्यादिभिरभियजेत्॥५८॥

विवरणम्

पीठान्त इति। समष्टिपूजानन्तरम्। हरिदिगादीति। हरिरिन्द्रः॥५८॥

पूर्णे हिरण्मयाम्बुजगजशिखिशक्तिस्वरूपन् निधायात्र।
कलशे सार्णसरोजे गुहमावाह्यार्चयेत् सहावरणैः॥५९॥

विमर्शिनी

हिरण्मयाम्बुजगजशिखिशक्तिस्वरून् सुवर्णमयपद्मगजमयूरशक्तिवज्रान् निधाय पूर्णे कलशे सार्णसरोजे पूजितलिपिपङ्कजेऽत्र गुहमावाह्य आवरणैः परिवारैः सहार्चयेत्॥५९॥

विवरणम्

पूर्ण इति। अत्र कलश इत्यन्वयः। हिरण्मयेति। हिरण्यकृतान् पद्मगजमयूरशक्ति-वज्रानित्यर्थः। हेमरत्नाक्षतं निक्षिप्य पूरणं सामान्यसिद्धम्। सार्णसरोज इति लिपिपङ्कजपूजोक्ता। मूर्तिद्वयमप्यावाह्य पूजनीयम्॥५९॥

प्राग्वज्रादेः प्रयजेदादित्यानश्विनौ पितॄन् गणपम्।
मात्रप्सरोवसूनिह रुद्रांश्चाभ्यन्तरे जयन्ताद्ये॥६०॥

विमर्शिनी

तत्र वज्रादेः प्राक् लोकपालपूजानन्तरं तदायुधपूजायाः प्राक् जयन्ताद्येऽभ्यन्तरे ईशेन्द्रयोर्मध्याद्यन्तरालेषु 'ओं आदित्येभ्यो नमः' 'ओं अश्विभ्यां नमः' इत्यादिमन्त्रैः

---

१. 'ष्णुमिह।' इति मूलकोशपाठः

Shripuram Publications
www.shripuram.org

आदित्यानश्विनौ पितॄन् गणपं गणपतिं मात्रप्सरोवसून् मातॄरप्सरसो वसून् रुद्राश्च प्रयजेत् ।।६० ।।

विवरणम्

जयन्ताद्य इति। ईशानेन्द्रान्तरालमारभ्येत्यर्थः।।६० ।।

गाङ्गेयरूप्यमयताम्रजकांस्यमृत्सा-
पात्राणि मौलिपदपार्श्वयुगाग्रभञ्जि।
विष्णौ क्रमेण घृतमाक्षिकदुग्धशान्ति-
वार्गव्यवन्त्यभिमृशेन्निजपञ्चतत्त्वैः।।६१ ।।

विमर्शिनी

उपहारस्थापनमाह - गाङ्गेयेति। विष्णौ मौलिपदपार्श्वयुगाग्रभाञ्जि शिरोभागे पादयोः समीपे पार्श्वयोरग्रभागे च स्थितानि घृतमाक्षिकदुग्धशान्तिवार्गव्यवन्ति क्रमेण आज्यमधुक्षीरशान्तिजलपञ्चगव्यपूरितानि गाङ्गेयरूप्यमयताम्रजकांस्यमृत्सापात्राणि क्रमात् सुवर्णरजतताम्रकांस्यमृन्मयपात्राणि निजपञ्चतत्त्वैः क्रमेणाभिमृशेत् संस्थाप्य स्पृष्ट्वा जपेत्।।६१ ।।

विवरणम्

गाङ्गेयरूप्यमयेति। सुवर्णकृतं रजतकृतं च पात्रं, मृत्सापात्रं प्रशस्तया मृदा कृतं पात्रं, मौलिः शिरोग्रदेशः पदं पादाग्रदेशः। अग्रं पुरोभागः माक्षिकं मधु, शान्तिवारिति हेमरत्नाक्षतयुतं जलं गृह्यते। निजपञ्चतत्त्वैः क्रमेणाभिमृशेदित्यन्वयः। फडन्तप्रणवप्रोक्षणं शोषणादिकं क्रमेण पञ्चतत्त्वैरिज्या चेष्यते।।६१ ।।

न्यस्येत् तद्वत् पदपरिसरे पात्रयोरर्घ्यपाद्ये
क्षीरक्षौद्रे मदनदमने पार्श्वयोर्मूलतश्च।
मूलेनार्ये घृतमधु शिरोङ्घ्र्योः कुमारेऽर्घ्यपाद्ये
पात्रद्वन्द्वे रजतरचिते स्वोपचाराणुनाङ्घ्र्योः[1] ।।६२ ।।

---

१. 'ङ्घ्र्योः।। मङ्ग' ख. पाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

विमर्शिनी

मदनदमने शिवे तद्वत् पदपरिसरे पादसमीपे पात्रयोरर्घ्यपाद्ये अर्घ्यं पाद्यं च, पार्श्वयोः पात्रयोः क्षीरक्षौद्रे क्षीरं मधु च मूलतो न्यस्येत्। आर्ये शिरोङ्घ्र्योः शिरस्समीपे पादसमीपे च मूलेन घृतमधु घृतं मधु च, कुमारे अङ्घ्र्योः पादयोः समीपे रजतरचिते पात्रद्वन्द्वे स्वोपचाराणुना 'ओं नमः षण्मुखाये'ति मन्त्रेणार्घ्यपाद्ये च न्यस्येत्। अत्रार्घ्यपाद्ययोर्द्रव्यं स्वस्वकलशादवगन्तव्यम्।।६२।।

विवरणम्

पदपरिसर इति। पदोद्देशसन्निधौ। पात्रयोरिति। पात्रं हैमादि ग्राह्यम्। मूलतश्चेत्येतदर्घ्यपाद्ययोरपि सम्बध्यते। क्षौद्रं मधु। मूलेनार्ये घृतमधु शिरोङ्घ्र्योरिति। शिरः सन्निधौ हैमादिपात्रे घृतं पादाग्रसन्निधौ च मध्विति विवेकः। अङ्घ्र्योरिति दक्षिणवामपादाग्रयोस्सन्निधाविति भावः।।६२।।

हैमे न्यसेच्छिरसि सुम्भरिपाविषेत्वे-
त्याज्यं पदे मधु च मध्विति रौप्यपात्रे।
मूलेन पार्श्वयुजि ताम्रजकांस्यजेऽर्घ्य-
पाद्ये हरीशगणपेऽत्र[1] हरीशवच्च।।६३।।

विमर्शिनी

अत्र शिवनारायणदुर्गयोर्वैष्णवोक्तं ग्राह्यं गणपतेः शिवोक्तं च। स्वस्वस्थाने स्वस्तिकानि विलिख्य धान्यानि दर्भांश्च निक्षिप्यैतानि स्थाप्यानि च।।६३।।

विवरणम्

हैम इति पात्रे। शिरसीति। शिरोद्देशे[2]। मध्वितीति। मधुवातः इत्यादिमनुभिः। पार्श्वयुजीति। दक्षिणपार्श्वे ताम्रपात्रेऽर्घ्यं वामपार्श्वे कांस्यपात्रे पाद्यं मूलेन न्यसेदित्यर्थः। हरीशगणपे तु हरीशवच्चेति। हरीशे हरिवद् गणपतौ शिववदित्यर्थः।।६३।।

मङ्गलान्यष्ट परितस्तथा मङ्गलपालिकाः।
प्रदीपादींश्च विन्यस्य मण्डयेन्मण्डपोदरम्।।६४।।

---

१. 'तु' क. पाठः, २. 'रोग्रोद्दे' घ. पाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

विमर्शिनी

तथाष्टमङ्गलानि मङ्गलपालिकाः प्रदीपादींश्च परितो विन्यस्य मण्डपोदरं मण्डपान्तर्भागं मण्डयेत् अलङ्कुर्यात्।।६४।।

विवरणम्

मङ्गलान्यष्ट परित इति। घृतमध्वाद्युक्तपात्रावरणबाह्ये स्वस्तिकानि विरचय्य तेषु प्रागाद्यष्टदिक्षु अष्टमङ्गलानि विन्यसेत्। यदुक्तम् -

"शय्याकुम्भान्तरे दिक्षु विन्यसेदष्टमङ्गलम्।"

इति। पुनः फडन्तप्रणवप्रोक्षणादि कृत्वा हृल्लेखया श्रीबीजेन वा पूजयेत्। तथा मङ्गलपालिका इति। विद्येश्वरकलशबाह्ये परितो व्रीहिपीठेषु प्रादक्षिण्येनेति भावः। 'पौर्वाह्निके प्रत्तबलीनि'त्यादि ह्युक्तम्। प्रदीपादींश्चेति धान्यपूर्णपात्रादिग्रहणम्।।६४।।

न्यस्येच्छङ्खारिकेतून् मुकुरवृषसृणींश्चामरं मत्स्ययुग्मं
दिक्ष्वीशे त्र्याद्यवत्सं मुकुरवृषझषद्वन्द्वकुम्भांस्त्रिधाम्नि।
श्रीशेशे स्वस्तिकाब्जं दरघटमुकुरं सोत्पलावर्तवत्सं
वत्सं कुम्भं सभेरीमुकुरझषसृणीच्छङ्खनन्द्यौ च चण्ड्याम्।।

विमर्शिनी

अष्टमङ्गलानि विविच्याह - न्यस्येदिति। ईशे दिक्षु शङ्खारिकेतून् शङ्खं चक्रं ध्वजं च, मुकुरवृषसृणीन् आदर्शं वृषभम् अङ्कुशं च, चामरं मत्स्ययुग्मं, याज्ञिकवृक्षैः कृतानेतान् शय्याया अष्टसु दिक्षु स्वस्तिकस्थेषु तण्डुलपूर्णेषु पात्रेषु न्यस्येत्। त्रिधाम्नि त्र्याद्यवत्सम् उक्तेषु त्र्याद्यं शङ्खारिकेतून् श्रीवत्सं च, मुकुरवृषझषद्वन्द्वकुम्भान् आदर्शं वृषभं मत्स्यद्वन्द्वं पूर्णकुम्भं च। श्रीशेशे स्वस्तिकाब्जं स्वस्तिकं पद्मं च, दरघटमुकुरं शङ्खं पूर्णकुम्भमादर्शं च, सोत्पलावर्तवत्सम् उत्पलं नन्द्यावर्तं श्रीवत्सं च। चण्ड्यां दुर्गायां वत्सं श्रीवत्सं, कुम्भं, सभेरीमुकुरझषसृणीन् भेरीमादर्शं मत्स्यद्वयमङ्कुशं च, शङ्खनन्द्यौ च शङ्खं नन्द्यावर्तं च न्यस्येत्।।६५।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

अष्टमङ्गलान्याचष्टे - न्यस्येच्छङ्खारिकेतूनिति। अरिः चक्रं, केतुः वृषाङ्कितो ध्वजः। मुकुरं दर्पणम्। सृणिरङ्कुशः। त्र्याद्येति। शङ्खं चक्रं गरुडाङ्कितध्वजश्च, वत्सः श्रीवत्सः। झषद्वन्द्वं मत्स्यमिथुनम्। स्वस्तिकेति।... घटं पूर्णकुम्भम्। आवर्तं नन्द्यावर्तं, वत्सं पूर्ववच्छ्रीवत्सम्। शङ्खनन्द्यौ चेति। नन्दी नन्द्यावर्तः।।६५।।

पूर्णघटध्वजवज्रं स्वस्तिकशक्ती च चामरद्वितयम्।
नागं मयूरमष्टौ स्कन्देऽपि करोतु मङ्गलान्यत्र[१]।।६६।।

विमर्शिनी

अत्र स्कन्दे पूर्णघटध्वजवज्रं पूर्णकुम्भं केतुं वज्रं च, स्वस्तिकशक्ती च स्वस्तिकं शक्तिं च, चामरद्वितयं, नागं गजं, मयूरमप्यष्टौ मङ्गलानि करोतु।।६६।।

विवरणम्

नागमिति गजम्।।६६।।

दर्पणं पूर्णकुम्भं च वृषभं चामरद्वयम्।
श्रीवत्सं स्वस्तिकं शङ्खं दीपं विघ्ने च शास्तरि।।६७।।

विमर्शिनी

गणपतिशास्त्रोरपि शिवोक्तवदेवाष्टमङ्गलानि योज्यानि।।६७।।

विवरणम्

गणपतौ शिवोक्तानि शास्तरि विष्णूक्तानि। यद्वा दर्पणं पूर्णकुम्भं चेति। दीपमिति भौमदीपग्रहणम्।।६७।।

इति संस्कृतमण्डपो[२]ऽस्य बाह्ये
शिवदिग्धाम्नि निधाय भद्रपीठम्।
परिपूज्य कुशादिमान् प्रयायात्
प्रतितीर्थं[३] प्रतिमामिह प्रणेतुम्।।६८।।

---

१. 'त्र।।इ पाठः', २. 'पे' क. पाठः, ३. 'बिम्दं प्र' ख. पाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

विमर्शिनी

एवं मण्डपाश्रितं कर्माभिधाय प्रतिमाश्रितं कर्म प्रस्तौति - इतीति। एवं संस्कृतमण्डपः संपादितमण्डपाश्रितकर्मा गुरुः अस्य बाह्ये शिवदिग्धाम्नि तस्येशभागस्थापरमण्डपे भद्रपीठं निधाय परिपूज्य पीठपूजां कृत्वा कुशादिमान् दर्भपुष्पवस्त्रगन्धादिसहितः इह अल्पमण्डपस्थभद्रपीठे प्रतिमां प्रणेतुमानेतुं प्रतितीर्थं तीर्थाभिमुखं प्रयायाद् गच्छेत्।।३८।।

विवरणम्

इति संस्कृतमण्डप इत्युपसंहारः। अस्य बाह्य इति। अस्य मण्डपस्य बाह्ये। शिवदिशि यो बिम्बशुद्धिमण्डपो यत्र बिम्बशुद्धिकलशपूजनमुक्तं तस्मिन् भद्रपीठं निधाय गुरुगणपतिपूजापूर्वकं स्वं स्वं पीठं सम्पूज्य तालत्रयादि कुर्यात्। अत्र विष्णौ प्राङ्मुखतया बिम्बं निधित्सितम्, इतरेषु प्रासादसम्मुखतयेति तदुचितयोगेन[१] पीठपूजा स्यादिति बोद्धव्यम्। कुशादिमानिति दर्भांशुकगन्धपुष्पादिग्रहणम्। इहेति। अस्मिन्नेव स्नपनमण्डपे।।६८।।

तद्रक्षणाय परितः कृतसन्निवेशं
संहृत्य दैवतगणं सलिलस्थबिम्बे।
उद्धृत्य वारिण इदं प्रविसृज्य वासो
दर्भैर्विधृष्य सलिलेन विशोधयेच्च।।६९।।

विमर्शिनी

तद्रक्षणाय तद्बिम्बरक्षणाय परितः कृतसन्निवेशं कृतावस्थानं दैवतगणं सलिलस्थबिम्बे संहृत्योद्वास्य इदं बिम्बं वारिण उद्धृत्य पूर्ववेष्टितं वासो विसृज्य दर्भैर्विघृष्य सलिलेन विशोधयेच्च।।६९।।

विवरणम्

तद्रक्षणायेति। पञ्चतत्त्वदेवतानाम् अस्त्रदेवताया दिक्पालानां च बिम्बात्मनि विलापनमुक्तम्। तत्र तीरे बिम्बाभिमुखोऽवस्थाय गुरुगणपतिवन्दनतालत्रयादिपूर्वकं मन्त्रप्राणायामादि सर्वं विधाय पञ्चतत्त्वदेवतादिषु पुष्पमाराध्य बिम्बे प्रणवेनोद्वासनं कार्यम्। जलतटे भद्रपीठं निधाय तत्र पीठपूजापीष्यते। वारिण इदमुद्धृत्येति। बिम्बं तत्पीठोद्वासनपूर्वकं प्रणवेनोद्धृत्य तीरे कुर्यात्। प्रविसृज्य वास इत्याच्छादनवस्त्रादि-

१. 'ततया पी' घ. पाठः

Shripuram Publications
www.shripuram.org

हानमुक्तम्। यदुक्तम् - 'अर्चामथावेष्ट्य सदर्भवस्त्रैरि'ति।।६९।।

कृत्वा तद्गतभूतसर्जनमिदं तन्मन्त्रसाङ्गीकृतं
गन्धाद्याहितचर्चनं प्रतिसरं तत्साम्प्रतिक्ये तथा।
बद्ध्वा वस्त्रसुवेष्टितं द्विजरथेऽथारोप्य वाद्यादिभिः
साकं शाकुनजापकः स्नपनगेहं मन्त्रबिम्बं नयेत्।।७०।।

विमर्शिनी

तद्गतभूतसर्जनं प्लावनादिकं भूतसृष्टिं च यथोक्तक्रमेण कृत्वा तन्मन्त्रसाङ्गीकृतं तत्तन्मन्त्रेण सकलीकृतं गन्धाद्याहितचर्चनं गन्धादिभिरलङ्कृतं कृतपूजनं च इदं मन्त्रबिम्बं तथा तत्साम्प्रतिक्ये तत्सम्प्रतिभवे तदानीं कौतुकबन्धयोग्ये देवे प्रतिसरं कौतुकं बद्ध्वा अथ वस्त्रसुवेष्टितं द्विजरथे द्विजैः कल्पिते रथे आरोप्य वाद्यादिभिर्वाद्यघोषादिमङ्गलध्वनिभिः साकं शाकुनजापकः द्विजैः सह 'कनिक्रददि'त्यादि जपन् स्नपनगेहं स्नानार्थं पूर्वं कल्पितं मण्डपं मन्त्रबिम्बं नयेत् प्रापयेत्।।७०।।

विवरणम्

कृत्वा तद्गतभूतसर्जनमिति। पुनर्भद्रपीठे प्राग्वन्निधाय तद्बिम्बगतभूतसर्गं विदध्यात्। जलाधिवासविधौ यत्पर्यन्तं कृतं तच्छेषकरणमेतदुक्तम्। अत्र ह्लामादिस्वस्वबीजोर्ध्वगतेत्याद्युक्तवैपरीत्येन मन्त्रप्रयोगौ भवतः। यथा - ओं हौं नमः परायाकाशात्मने नम इति बिम्बमूर्ध्नि स्पृशन् पञ्चविंशतिवारेण सकृत् कुम्भकं विधाय तेनैव तदादिताल्वन्तं व्यापयेदित्यादि। उद्घातावृत्त्यैव प्राणायामाः स्युरिति। इदमिति। बिम्बम्। तन्मन्त्रसाङ्गीकृतमिति सकृल्लिपिन्यासपूर्वकं मन्त्रप्राणायामव्यापकवर्णाङ्गन्यासाभिप्रायम्। गन्धाद्याहितचर्चनमिति गन्धमाल्याद्यलङ्करणं गन्धपुष्पादिपूजनं चोक्तम्। प्रतिसरं तत्साम्प्रतिक्ये तथा बद्ध्वेति। प्रतिसरं कौतुकं तस्य साम्प्रतिक्ये साम्प्रतिकत्वे सम्प्रतिकार्यत्वे। यदुक्तम् - 'मुरभिदि जलवासोद्घृतावि'ति। 'बद्ध्वा सोपचारेणाष्टार्णेने'ति। स्थित्वा प्रार्थ्येत्याद्युक्तविधया कौतुकबन्धनं विष्णौ विधायेति भावः। तीर्थोद्वासनमपि कार्यम्। शाकुनजापक इति कनिक्रदत्स्वस्तिसूक्तजपाभिप्रायम्।।७०।।

Shripuram Publications
www.shripuram.org

प्रासादसम्मुखतया विनिधाय भद्रं
कर्णेत्यृचं जपतु सर्वसुपर्वबिम्बम् ।
न्यस्येत् त्रिधाम्नि हरिदिङ्मुखमिष्टपीठे
त्रीणीत्यृचा जपतु भद्रमृचं तदग्रे ।।७१ ।।

विमर्शिनी

तत्र सर्वसुपर्व[१](णां) देवानां बिम्बम् इष्टपीठे पूर्वं पूजिते पीठे प्रासादसम्मुखतया मूलप्रासादाभिमुख्येन विनिधाय 'भद्रं कर्णेभि'रित्यृचं जपतु । त्रिधाम्नीष्टपीठे हरिदिङ्मुखं पूर्वाभिमुखं 'त्रीणि पदा विचक्रमे' इत्यृचा न्यस्येत् । तदग्रे स्थित्वा 'भद्रं कर्णेभिः' इत्यृचं जपतु च ।।७१ ।।

विवरणम्

प्रासादसम्मुखतया सर्वसुपर्वबिम्बं विनिधायेत्यन्वयः । सुपर्वाणो देवाः । इष्टपीठ इत्येतदिहापि योज्यम् । भद्रपीठं परिपूज्येति ह्युक्तम् । न्यस्येदिति त्रीणीत्यृचेति सम्बध्यते । 'त्रीणि पदे'ति मन्त्रेण । हरिदिङ्मुखमिति । इन्द्रदिगभिमुखम् । तदग्रे भद्रमृचं जपत्विति । देवाग्रे तिष्ठन् 'भद्रं कर्णेभिरि'त्यृचं जपेत् ।।७१ ।।

श्रीशेशाजितयोर्घृतेन घृतवत्याङ्क्त्वा हरीशे नम-
स्ते रुद्रेति विशोधयेन्मुररिपौ मूलेन मासूरकैः ।
तेजोऽसीति हरौ घृताक्तिरथवा[२] कार्या द्वयं मूलतः
स्कन्देभाननयोः स्वकल्पविधिना शेषेष्वथैतच्चरेत् ।।७२ ।।

विमर्शिनी

अथ श्रीशेशाजितयोर्घृतेन घृतवत्या 'घृतवती सवितुरि'त्यृचा अङ्क्त्वा अञ्जनं कृत्वा, हरीशे 'नमस्ते रुद्र मन्यव' इति, मुररिपौ मूलेन च मासूरकैः शोधयेत् । (മാസൂരകം = കടലക്കാപ്പൊടി) । अथवा हरौ 'तेजोऽसी'ति मन्त्रेण घृताक्तिः घृतसेचना कार्या । स्कन्देभाननयोर्द्वयं घृतसेचनं शोधनं च मूलतः, शेषेषु एतद्द्वयं स्वस्वकल्पविधिना चरेत् ।।७२ ।।

---

१. 'र्बबि' ख. पाठः, २. 'वैशे मूलतः सर्पिषा क्षौद्रेणापि विलिप्य शोधयतु वा र्मासूरवार्भिः क्रमात् ।। दीर्घायुत्वेत्यणुकृतघृतालेपमुद्वर्त्यं बिम्बं मासूरेण द्रुपदमनुना क्षालयेत् सुम्भहन्त्र्याम् । मूलेनैतद् गुहगणपयोराचरेत् सर्वमार्ये शैरीषैः शोधयतु घृतमध्वक्तिकृन्मूलतोऽथ ।। द' क.ग.पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

घृतवत्येति। 'घृतवती सवितरि'त्यृचा मासूरकैर्विशोधयेदिति योज्यम्। मासूरवार्भिः क्रमादिति। यदुक्तम्-

"घृतेन मधुनालिप्य क्षालयेच्छुद्धवारिभिः।"

इति। पुनर्मासूरजलाभ्यां शोधनं लौकिकमेव।।७२।।

*'दीर्घायुत्वे'त्यणुः। द्रुपदमनुना 'द्रुपदादिवेदि'त्यादियजुषा। क्षालयेदिति। जलैरिति गम्यते। मूलेनैतद् गुहगणपयोराचरेत् सर्वमिति। घृतालेपनमासूरोद्वर्तनपूर्वकं क्षालनं च। आर्ये मूलतो घृतमध्वक्तिकृच्छैरीषैश्शोधयत्विति योजना। शोधनमिह लौकिकमेव।।

दर्भाद्यैः परिघृष्य शोधयतु दुर्गायां जलैस्त्वक्छकृ-
न्मृत्साभस्मभिरीश्वरे प्रमथपे मृत्त्वक्छकृद्भिः क्रमात्।
मृत्त्वग्भ्यां गणपे गुहे स्वकलशोक्तद्रव्यकैः स्वाणुभि-
र्मृद्भिः श्रीशहरीशयोः स्वविहिताभिर्वक्ष्यमाणक्रमात्।।७३।।

विमर्शिनी

ततो दुर्गायां दर्भाद्यैः दर्भमृत्त्वग्भिः क्रमात् परिघृष्य जलैः शोधयतु। ईश्वरे त्वक्छकृन्मृत्साभस्माभिः परिघृष्य शोधयतु। प्रमथपे मृत्त्वक्छकृद्भिः, गणपे मृत्त्वग्भ्यां, गुहे स्वकलशोक्तद्रव्यकैः सर्वैः सर्वैः स्वाणुभिश्च श्रीशहरीशयोः स्वविहिताभिर्मृद्भिर्वक्ष्यमाण-क्रमात्।।७३।।

विवरणम्

दर्भाद्यैरिति। दर्भमृत्त्वग्भिः। त्वक्छकृन्मृत्साभस्मभिरीश्वर इति वाक्यम्। गुहे स्वकलशोक्तद्रव्यकैः स्वाणुभिरिति। अत्रायमाशयः-

"मूलेन कुशकूर्चेन कौश्या गव्यसुदिग्धया।
मुष्ट्या दार्भ्यैव वास्त्रेण क्वाथचूर्णेन वर्मणा।।
दूर्वापिष्टेन मूलेन हृदा सर्षपपिष्टतः।
मृदा मूलेन चोद्घृष्य तत्तत्कुम्भाभिषेचनम्।।

इति। सर्वत्रास्त्रमेव वा मन्त्रः स्यादिति। वक्ष्यमाणक्रमादिति। यथा - 'लक्ष्मीशे

---

* दीर्घायुत्वेत्यादि क. ग. गताधिकपाठमाश्रित्येदं विवरणव्याख्यानम्।

Shripuram Publications
www.shripuram.org

विहितसप्तमृत्तिकाभिरि'त्यादि । 'शाङ्र्गीश्वरे वृषविषाणे'त्यादि ।।७३ ।।

दु[१]र्गागणेशशरजन्मसु बिम्बशुद्धि-
स्नानात् पुरो हरिहरीश्वरयोः करोतु ।
स्नानान्तरे नयनमोक्षणमार्यके तत्
प्राक् स्नानतः सलिलवासनकर्मतो वा ।।७४ ।।

विमर्शिनी

नेत्रोन्मीलनकालमाह - दुर्गेति । दुर्गागणेशशरजन्मसु बिम्बशुद्धिस्नानात् पुरः पूर्वं नयनमोक्षणं करोतु । हरिहरीश्वरयोः स्नानान्तरे स्नानमध्ये आर्ये स्नपनतः प्राक् तद् नयनमोक्षणं, सलिलवासनकर्मतो जलाधिवासात् प्राग् वा ।।७४ ।।

विवरणम्

बिम्बशुद्धिस्नानात् पुर इति । यदेतच्छोधनमुक्तं तत्कृत्वा नेत्रोन्मीलनं पुनरावाह्य साङ्गीकरणादि कृत्वेत्येतदादि कार्यमिति भावः । स्नानान्तरे इति । बिम्बशुद्धिस्नपनमध्ये । वक्ष्यति च - "इत्यभिषिच्याक्षिणी विलिखेदि"ति ।

"सिञ्चेदच्छजलैस्ततो वितनुयान्नेत्रत्रयोन्मीलनम् ।"

इति । सलिलवासनकर्मतो वेति । प्रागित्यनुषङ्गः ।।७४ ।।

हैमे निषिच्य चषके मधुमन्त्रजप्तं
सूच्या प्रगृह्य घृतमाक्षिकमक्षिमोक्षम् ।
नेत्रेण शास्तृ[२]गणपेषुभवेषु मन्त्री
त्रिष्टुम्मयेन मनुना तनुयात् कुमार्याम् ।।७५ ।।

विमर्शिनी

नेत्रोल्लेखनक्रियाविधानमाह - हैम इति । मन्त्री मन्त्रविशेषज्ञो गुरुः शास्तृगणपेषुभवेषु हैमे चषके घृतमाक्षिकं घृतं मधु च निषिच्य मधुमन्त्रजप्तं 'मधु वाता' इत्यादितृचेन जप्तं तत् सूच्या सुवर्णसूच्या प्रगृह्य नेत्रेण नेत्रमन्त्रेण अक्षिमोक्षं नयनोन्मीलनं सतारकार्चिः

---

१. 'र्गायां गणपे च बिम्बकलशासेकात् पुरः प्राचरेन्नेत्रोल्लेखनमार्यके निगदितं तत्तोयवासात् पुरः । दुर्गावद् विदधीत पावकभवे भूतेशवद् वाथ तच्छ्रीशेशाजितयोस्तु बिम्बकलशस्नानक्रमस्यान्तरे ।। है' ख. पाठः, २. 'वदिभास्यषडास्ययोश्च त्रि' ख. पाठः

www.shripuram.org

तारकार्चिभ्यां सह तारकं मूलेन तत्रस्थं तेजः प्रणवेन च तनुयात्। तारकार्चिलेखनं सर्वत्र समानम्। कुमार्यां त्रिष्टुम्मयेन 'जातवेदस' इत्यृचा।।७५।।

विवरणम्

हैमे निषिच्य चषक इति। घृतमाक्षिकमिति लभ्यते। अस्त्रप्रोक्षणशोषणादि सर्वं सामान्यसिद्धम्। अक्षिमोक्षमिति। नेत्रोन्मीलनम्। मन्त्री इति.....।।७५।।

हिरण्यगर्भः समिति प्रगृह्य मध्वाज्यकं चित्रमिति त्रिधाम्नि[1]।
नेत्रं लिखेद् दक्षिणमन्यद[2]त्राप्यायस्वमन्त्रेण सतारकार्चिः[3]।।७६।।

विमर्शिनी

त्रिधाम्नि 'हिरण्यगर्भः समवर्तत' इति मध्वाज्यकं प्रगृह्य दक्षिणं नेत्रं 'चित्रं देवानाम्' इत्यृचा, अत्रान्यन्नेत्रम् 'आप्यायस्व'मन्त्रेण च लिखेत्।।७६।।

विवरणम्

प्रगृह्येति। 'हैमे निषिच्य चषके मधुमन्त्रजप्तं सूच्या' इत्येतदनुषज्यते।।७६।।

माध्वीदुग्धघृतं हिरण्यमनुना संगृह्य शाङ्गींश्वरे
वामं चित्रमृचोल्लिखेन्नयनमन्यद् विश्वतश्चक्षुषा।
लालाटाक्षि हिरण्यगर्भमनुनाथापूर्य गामग्रगां
हत्वा नेत्रपटं प्रदर्शयतु तां कर्ताथ तस्मै दिशेत्।।७७।।

विमर्शिनी

शाङ्गींश्वरे हैमे चषके निषिक्तं माध्वीदुग्धघृतं 'हिरण्यगर्भः सम्' इति मनुना संगृह्य पूर्वं वामं नयनं 'चित्रं देवानाम्' इत्यृचोल्लिखेत्। अन्यद् दक्षिणं 'विश्वतश्चक्षुषा' इत्यृचा। लालाटाक्षि ललाटनेत्रं हिरण्यगर्भमनुना चोल्लिखेत्। अथानन्तरवक्ष्यमाणं सर्वत्र समानम्। नेत्रमापूर्य नेत्रपटं हत्वा नयनमोक्षणात् पूर्वं पुरोभागे वस्त्रं प्रसार्य तत्कर्म कृत्वा नेत्र[4]पटं हत्वा अग्रगां गां अग्रे गामानीय तां प्रदर्शयतु। अथ कर्ता यजमानः तां गां तस्मै गुरवे दिशेत्।।७७।।

---

१. 'म्नः', २. 'म' ख. पाठः, 'दस्याप्या' क. ख. ग. घ. पाठः, ३. 'द्यम्' ख. पाठः, ४. 'पटलं हृ' ङ. पाठः

Shripuram Publications www.shripuram.org www.shripuram.org

विवरणम्

माध्वीदुग्धघृतमिति। अत्राप्येतदनुषङ्गः। माध्वी मधु। अथापूर्येत्यादि सर्वशेषत्वेन योज्यम्। नेत्रपटं हृत्वा अग्रगां गां प्रदर्शयतु इत्यन्वयः। प्रागेवाग्रे गां सन्निधाप्य तां बिम्बं चान्तरा नेत्रपटं विततं कृत्वा नेत्रोन्मीलनं कार्यम्। तस्मै इति। आचार्याय।।७७।।

आवाह्य[1] साङ्गीकरणादि कृत्वा दत्त्वोपहारान् स्नपनं करोतु।
विघ्नार्यदुर्गाशरजेषु शेषेष्वावाहनाद्यं स्नपने कृते तु।।७८।।

विमर्शिनी

विघ्नार्यदुर्गाशरजेषु मूलेनावाह्य साङ्गीकरणादि कृत्वा उपहारान् क्रमाद् दत्त्वा स्नपनं बिम्बशुद्धिस्नपनं करोतु। शेषेषु स्नपने कृते त्वावाहनाद्यं करोतु।।७८।।

विवरणम्

विघ्नादिषु स्नानवेलायां बिम्बशुद्धिरित्याह - आवाह्येति। हरिहरादिषु क्षालनमेतदित्याह - शेषेष्विति।।७८।।

लक्ष्मीशे स्वविहितसप्तमृत्तिकाभि-
र्मूर्धानं दिव इति मन्त्रतो विलिप्य।
तन्मृत्सा[2]सुभृतघटाम्भसा समुद्र-
ज्येष्ठा इत्यणुपरिजापकोऽभिषिञ्चेत्।।७९।।

विमर्शिनी

अथ बिम्बशुद्धिस्नपनकलशोपहारदानादिकं पृथक् पृथगेवाह - लक्ष्मीश इत्यादिभिः। लक्ष्मीशे स्वविहितसप्तमृत्तिकाभिः स्वकलशपूरण उक्ताभिः सप्त[3]मृत्तिकाभिर्वल्मीकमृद्भिः 'मूर्धानं दिवः' इति मन्त्रतो विलिप्य तन्मृत्सासुभृतघटाम्भसा तन्मृद्भिः पूर्णेन ब्रह्मकलशेन 'समुद्रज्येष्ठा' इत्यणुपरिजापको गुरुरभिषिञ्चेत्।।७९।।

---

१. अस्य स्थाने

'विस्पष्टतायै पृथगेव वच्मि विष्ण्वादिबिम्बस्नपनं समासात्।
मूलाणुसाङ्गीकरणोपहारादत्युत्तरं वैतदिह प्रयोज्यम्।।' इति ख. पाठः

२. 'त्स्ना' क. पाठः, ३. 'प्तव' ङ. पाठः

Shripuram Publications
www.shripuram.org

विवरणम्

अथ पृथगेव तत्तद्बिम्बशुद्धिरभिधीयते - स्वविहितसप्तमृत्तिकाभिरिति। सप्तवल्मीकमृद्भिरित्यर्थः। तन्मृत्सासुभृतघटाम्भसेति। 'वल्मीकसप्तकमृदः कलशेऽथ मध्ये' इत्यमुनेत्यर्थः।।७९।।

प्रागादिदिग्दलस्थैर्यज्ञा यज्ञा पयः पृथिव्यां च।
याः फलिनीर्या दिव्या इत्यभिषिच्याक्षिणी विलिखेत्।।८०।।

विमर्शिनी

प्रागादिदिग्दलस्थैः कलशैः 'यज्ञा यज्ञा वः', 'पयः पृथिव्यां', 'याः फलिनीः', 'या दिव्याः' इति चतुर्भिरभिषिच्याक्षिणी विलिखेत्। तदा नेत्रोल्लेखनमित्यर्थः।।८०।।

हंसः शुचिषद्विष्णोरराटमिति चानलादिदलकलशैः।
सोमं राजानमृचा सविश्वतश्चक्षुषापि च स्नपयेत्।।८१।।

विमर्शिनी

'हंसः शुचिषद्', 'विष्णोरराटं', 'सोमं राजानं', सविश्वतश्चक्षुषा 'विश्वतश्चक्षुः' इत्यनया चर्चा अनलादिदलकलशैः अग्न्यादिकोणदलकलशैश्च स्नपयेत्।।८१।।

उद्वर्त्य द्रुपदादिनागलतलान्मासूरपिष्टैस्तनौ
मानस्तोकऋचा च मूर्ध्नि मुरमांसीक्षीरपिष्टामलैः।
आलिप्याथ बहिष्ठगन्धसलिलैर्विष्णोरराटाणुना
संसिञ्चेदिदमाप इत्युपघटैर्दिक्कोणसंस्थैः सह।।८२।।

विमर्शिनी

द्रुपदादिना 'द्रुपदादिवेन्मुमुचानः' इत्यादिना मासूरपिष्टैः आगलतलादाकण्ठपर्यन्तं तनौ देहे उद्वर्त्य मूर्ध्नि मुरमांसीक्षीरपिष्टामलैः मुरमांसीभ्यां क्षीरेण च सह पिष्टैरामलकैः 'मा नस्तोके तनये' इत्यृचा चालिप्याथ बहिष्ठगन्धसलिलैर्दिक्कोणसंस्थैः विष्णोरराटाणुना, तत्र तत्र दिक्कोणसंस्थैरुपघटैः 'इ(मा?द)मापः' इति मनुना च सह संसिञ्चेत्।।८२।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

उद्वर्त्येति। गळात्प्रभृति बिम्बशरीरे मासूरपिष्टैर्द्रुपदादिवेत्युद्वर्तयेत्। पुनः क्षीरेण मुरमांसीभ्यां सह पिष्टं यदामलकं तेन शिरसि 'मा नस्तोके' इत्यालेपयेदित्यर्थः।।८२।।

बिम्बकलशाभिषेकं कृत्वेत्येह्येहिरूपूर्वमन्त्रेण।
आवाह्य विष्णुमेनं मूलाङ्गन्यासमाचरेन्मन्त्री।।८३।।

विमर्शिनी

इति बिम्बकलशाभिषेकं कृत्वा 'एह्येहि' इति पूर्वमन्त्रेण मन्त्री आवाहने मन्त्रविशेषयोजनं कुर्वन् एनं विष्णुमावाह्य मूलाङ्गन्यासं मूलाङ्गन्यासव्यापकाङ्गन्यासादिकमाचरेत्।।८३।।

विवरणम्

मन्त्रीति। 'एह्येहि' इत्यादिमन्त्रान्ते मूलमुक्त्वा नारायणमावाहयामीत्येवमावाहनमुक्तम्।।८३।।

एह्येहि भगवन्! विष्णो! लोकानुग्रहकारक!।
यज्ञभागं गृहाणेमं वासुदेव! नमोऽस्तु ते[1]।।

इति।।८४।।

विमर्शिनी

आवाहनमन्त्रं पठति - एह्येहीति।।८४।।

अर्घ्यं रातु हिरण्मयादिमनुना तस्मै सपाद्योदकं
गायत्र्याचमनीयकं समधुपर्कं च स्वया मन्त्रवित्।
मन्त्रेणाथ बृहस्पते अतियदित्याद्येन पीताम्बरं
वेदाहंमनुनोत्तरीयमुपवीतं हैममोङ्कारतः।।८५।।

विमर्शिनी

तस्मै विष्णवे हिरण्मयादिमनुनार्घ्यं सपाद्योदकं रातु दद्यात्। मन्त्रविदिति तत्तदुपहारदाने 'अर्घ्यम्' इत्यादिमन्त्रयोगः सूचितः। स्वगायत्र्याचमनीयं समधुपर्कं च,

---

१. 'ते।। अ' ख. पाठः

Shripuram Publications
www.shripuram.org

'बृहस्पते अति यत्' इत्याद्येन मन्त्रेण पीताम्बरं पीतवस्त्रं च, 'वेदाहं' मनुनोत्तरीयम्, ओङ्कारतः प्रणवेन हैममुपवीतं च।।८५।।

विवरणम्

रात्विति। 'रा दाने' दद्यादित्यर्थः। सपाद्योदकमिति। तेनैव मन्त्रेण पाद्यमिति भावः। तदुक्तम् - 'पाद्यं तेनैव दापयेत्' इति। स्वया गायत्र्येति योज्यम्। समधुपर्कं चेति। तेनैव मन्त्रेणेति भावः। अत्राघ्यार्द्युपहारास्तत्तद्[1]द्रव्यभाजः फडन्तप्रणवप्रोक्षणशोषणादिसंस्कृताः स्युः। पीताम्बरादिष्वपि यथार्हं समानमेतत्। मन्त्रविदिति। तत्तन्मन्त्रान्ते तत्तदुक्त्वा समर्पयामीत्येवं मन्त्रप्रयोग उक्तः। पीताम्बरमिति। रात्वित्यनुवर्तते। वस्त्रादिषु परिधापनादि कार्यम्। तदुक्तम् - 'वासस्तु परिघापयेत्' इत्यादि।।८५।।

गन्धं च पुष्पं च पवित्रकं च
दद्यादिदं विष्णुऋचा क्रमेण।
विश्वाणुनार्चिर्मयमादधीत
व्यापय्य तं सर्गविसर्गरीत्या।।८६।।

विमर्शिनी

'इदं विष्णुः' इत्यृचा गन्धं च पुष्पं च हैमं पवित्रकं च क्रमेण दद्यात्। विश्वाणुना 'विश्वतश्चक्षुः' इत्यृचा तं सर्गविसर्गरीत्या सृष्टिसंहारक्रमेण व्यापय्य अर्चिर्मयं तेजोमयमादधीत।।८६।।

विवरणम्

विश्वाणुनेति। तं सर्गसंहारप्रकारेण 'विश्वतश्चक्षुः' इति व्यापय्य तेजोमयं सकलनिष्कलात्मकं विभावयेदित्यर्थः।।८६।।

पुष्पैरोषधयः समित्यविकिरेत् सन्धूपयेद् धूरसी-
त्येतेनोपहरेत् प्रदीपकमथो तेजोसिमन्त्रेण च।
नेत्रे चाञ्जनरञ्जिते वितनुयाद् भूयः समिद्धोणुना
येनाकस्यमनुं जपन् वितनुयाद् गोरोचनाचित्रकम्।।८७।।

---

१. 'स्तद्द्रव्य' घ. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

'ओषधयः संवदन्ते' इति पुष्पैरविकिरेत्। 'धूरसि' इत्यनेन सन्धूपयेत्। अथो 'तेजोऽसि'मन्त्रेण प्रदीपकमुपहरेत्। अथो इत्यनेनान्तरान्तरा जलदानं सूचितम्। भूयः समिद्धोणुना "समिद्धो अञ्जन्" इति मन्त्रेण नेत्रे द्वे अञ्जनरञ्जिते वितनुयात्। 'ये नाकस्य' मनुं जपन् गोरोचनाचित्रकं गोरोचनया तिलकं वितनुयात्।।८७।।

विवरणम्

समिद्धोणुनेति। 'समिद्धो अञ्जन्' इत्यनेन।।८७।।

वनस्पतेः पुष्प इति प्रजापी
माल्यं च मालां च समर्प्य तस्मै।
दत्त्वोपहारान् पुनरर्घ्यधारां
मूलेन दत्त्वा विकिरेत् प्रसूनैः।।८८।।

विमर्शिनी

'वनस्पतेः पुष्प' इति प्रजापी माल्यं पुष्पं मालां च तस्मै समर्प्य पुनरुपहारान् अर्घ्यपाद्याचमनीयानि दत्त्वा अर्घ्यधारां मूलेन दत्त्वा प्रसूनैर्विकिरेत्।।८८।।

विवरणम्

दत्त्वोपहारानिति जलगन्धादिभिः सपर्योक्ता।।८८।।

रथन्तरेण वैराजगायत्राभ्यां च सामभिः।
स्वयोनिजैः पुरः स्थित्वा स्तुवन् सम्प्रीणयेद्धरिम्।।८९।।

विमर्शिनी

रथन्तरेण, वैराजगायत्राभ्यां च, स्वयोनिजैः रथन्तरस्य 'अभि त्वा शूर' इत्याद्येन वैराजस्य 'पिबा सोममिन्द्र' इत्याद्येन, गायत्रस्य 'अग्न आयूंषि' इत्याद्येन सामभिः स्तुवन् हरिं सम्प्रीणयेत्।।८९।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

स्वयोनिजैरिति। 'अभि त्वा शूर' 'पिबा सोममिन्द्र' 'अग्न आयूंषि' इत्येताः स्वयोनयस्तद्वर्त्तिभिरित्यर्थः।।८९।।

शुद्धे तैजसपात्रके सुविमलैरापूरिते तण्डुलै-
र्मध्ये सान्द्रघृतं शरावमुपधायाभ्युज्ज्वलद्दीपकम्।
स्वोद्यद्गोमयक्लृप्तचित्रितदिगीशास्त्रैः सदूर्वाग्रकै-
र्दिक्ष्वश्वत्थदलैर्विभूष्य रचयेन्नीराजनीयं शुभम्।।९०।।

विमर्शिनी

नीराजनीयसम्पादनमाह - शुद्ध इति। शुद्धे सुविमलैस्तण्डुलैरापूरिते तैजसपात्रके लोहमयपात्रे मध्ये तन्मध्ये सान्द्रघृतं पूर्णघृतम् अभ्युज्ज्वलद्दीपकम् अभितः परितः उज्ज्वलद्भिर्दीपैः उज्ज्वलद्वर्तिभिर्युतं शरावमुपधाय तस्य दिक्षु स्वोद्यद्गोमयक्लृप्तचित्रित-दिगीशास्त्रैः स्वस्मिन्नुद्यतानि गोमयेन क्लृप्तानि श्वेतरक्तादिरजोभिश्चित्रितानि दिगीशास्त्राणि वज्रादीनि येषु तैः सदूर्वाग्रकैः दूर्वाग्रयुक्तैरश्वत्थदलैर्विभूष्य शुभं नीराजनीयं रचयेत्। तथा विष्णुसंहितायां -

"शुभे तु तैजसे पात्रे शालितण्डुलपूरिते।
अस्त्रैरश्वत्थपत्रस्थैर्नवगोमयकल्पितैः।।
वर्णोज्ज्वलैर्यथाशोभं वर्धमानाज्यवर्त्तिभिः।
उज्ज्वलाभिर्युतं मध्ये कुर्यान्नीराजनं त्विदम्।।"

इति।।९०।।

विवरणम्

नीराजनीयमाह - शुद्ध इति। मार्जनादिशुद्धिरियम्। यद्वा अस्त्रक्षालनादिशुद्ध्य-भिप्रायम्। तैजसपात्रक इति। ताम्रकांस्यादिमये। सुविमलैरापूरित इति। हृदयेनेति ज्ञेयम्। शरावमस्त्रधौतं हृदैव निधाय अष्टदिक्षु चतुर्दिक्षु अग्रदिश्येव वा वर्त्तीर्[1]हृदैव विन्यस्य सान्द्रेण घृतेन शिरसापूर्यास्त्रेण ता वर्त्तीः [2]प्रज्वालयेत्। स्वोद्यदित्याद्यश्वत्थदल-विशेषणम्। तेषामुदरभागे गोमयेन वज्रशक्त्याद्यायुधानि विरचय्य तेषु रजनीरजो विकिरेत्।

१. 'र्त्तिं हृ', २. 'सं' घ. पाठः

Shripuram Publications
www.shripuram.org

www.shripuram.org

तदुपरि प्रतिपत्रं दुर्वाग्राण्यपि बहिरग्राणि विन्यसेत्। सर्वमेतदस्त्रेण कार्यम्। दूर्वाक्षतमपि पृथक् सम्पाद्यम्।।९०।।

दूर्वाक्षतं मूर्धनि पादयोश्च
तारेण कृत्वास्त्रसमर्चितेन।
नीराजयेत् तेन निजास्त्रजापी
कुर्वीत पुण्याहमिति त्रिधाम्नि।।९१।।

विमर्शिनी

नीराजनीयविनियोजनादिकमाहं - दूर्वाक्षतमिति। तारेण दूर्वाक्षतं मूर्धनि पादयोश्च कृत्वा अस्त्रसमर्चितेन तेन नीराजनीयेन निजास्त्रजापी नीराजयेत्। 'ओं विष्णुः प्रीयताम्' इत्यादिविशेषयुक्तं पुण्याहं च कुर्वीत। इति त्रिधाम्नि बिम्बविशुद्धिविधिः स्यात्।।९१।।

विवरणम्

अस्त्रसमर्चितेनेति फडन्तप्रणवप्रोक्षणशोषणाद्यस्त्रपूजनवज्रादिषु तत्तन्मनुपूजनास्त्र-[1] जपाभिप्रायम्। तेनेति उक्तनीराजनीयेनेत्यर्थः। तिष्ठंस्त्रिवारं पञ्चवारं वा नीराजयेत्। दूर्वाक्षतं मूर्धनि पादयोश्च तारेण कृत्वेत्येतत् पुनरपि कार्यम्। 'मङ्गलानि च दर्शयेत्' इति चाहुः। इति त्रिधाम्नीति प्रकरणोपसंहारः। बिम्बशुद्धिरिति च शेषः।।९१।।

शाङ्गींश्वरे वृषविषाणनदीद्वितीर-
मृद्भिर्विलिप्य शिरसि प्रणवेन सिञ्चेत्।
तद्वत् तनौ समुपलिप्य मृदा सनाकु-
क्षेत्रोत्थयाच्छसलिलैरपि तेन सिञ्चेत्।।९२।।

विमर्शिनी

शाङ्गींश्वरे शिरसि प्रणवेन वृषविषाणनदीद्वितीरमृद्भिः वृषशृङ्गाद् नदीतीरद्वयाद् गृहीताभिर्मृद्भिर्विलिप्याच्छसलिलैः शुद्धजलैः सिञ्चेत्। तनौ तद्वत् सनाकुक्षेत्रोत्थया (मृदा) वल्मीकात् क्षेत्राच्च गृहीताभ्यां मृद्भ्यां तेन प्रणवेन समुपलिप्याच्छसलिलैः सिञ्चेत्।।९२।।

---

१. 'तन्मनु' घ. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

प्रणवेन सिञ्चेदिति। अच्छसलिलैरभिषिञ्चेदित्यर्थः। नाकुर्वल्मीकम्।।९२।।

एवं साधु विशोध्य तं स्नपितयेन्मृत्पूर्णकुम्भाम्भसा
मानस्तोकऋचा कषायपयसावोचाममन्त्रेण च।
आज्यान्तैर्ध्रुवतः फलादि्भरथ मूलेनान्तराब्लिङ्गकैः
सिञ्चेदच्छजलैस्ततो वितनुयान्नेत्रत्रयोन्मीलनम्।।९३।।

विमर्शिनी

एवं साधु विशोध्य मृत्पूर्णकुम्भाम्भसा मध्यकलशेन मा नस्तोक ऋचा तं शाङ्र्गीश्वरं स्नपितयेत् स्नपितं कुर्यात्। कषायपयसा पूर्वदलस्थकलशेन 'अवोचाम[1] नमः' इति मन्त्रेण च, आज्यान्तैः दक्षिणपश्चिमोत्तराग्नेयनिरृतिदलस्थैः गोमूत्रगोमयक्षीर-दध्याज्यपूर्णकलशैः ध्रुवतश्च, अथ मूलेन वायव्यदलस्थफलादि्भश्च, अन्तरा मध्ये मध्ये अच्छजलैः अब्लिङ्गकैः आपो हि ष्ठादिभिः सिञ्चेत्। ततो नेत्रत्रयोन्मीलनं वितनुयात्।।९३।।

विवरणम्

मृत्पूर्णकुम्भाम्भसेति। 'मृत्क्वाथकं[2] हरिहरे' इत्यादि ह्युक्तम्। आज्यान्तैर्ध्रुवत इति। 'पृथगास्थितानि गव्यानि पञ्च' इत्युक्तैरिति भावः। फलादि्भरथ मूलेनेति वाक्यम्। अन्तरेति प्रतिद्रव्यमन्तरा स्नानमुक्तम्।।९३।।

नमः शम्भव इत्याद्यमिषे त्वाद्यं च सिञ्चतु।
नमो वः किरिकेत्युक्त्वा सर्वौषधिजलेन तम्।।९४।।

विमर्शिनी

ततः ईशदलस्थितेन सर्वौषधिजलेन तं देवं 'नमः शम्भवे' इत्याद्यम् 'इषे त्वाद्यं' 'नमो वः किरिकेभ्यः' इत्याद्यं चोक्त्वा सिञ्चतु।।९४।।

विवरणम्

नमश्शम्भव इत्याद्यमिति सर्वौषधिकलशे मन्त्रत्रयमुक्तम्।।९४।।

---

१. 'चमानम इ' क. पाठः, २. 'का' घ. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

तत् त्वा यामीत्याद्यर्चा समुद्रं
गच्छेत्यापोहीत्यणुभ्यां च मन्त्री।
गायत्र्या च स्नापयेद् दिक्स्थखण्डै-
र्गायत्र्या चोंरुद्धया कोणखण्डैः[१]।।९५।।

विमर्शिनी

पुनः दिक्स्थखण्डैः दिवखण्डस्थकलशैः 'तत् त्वा यामि' इत्याद्यर्चा, 'समुद्रं गच्छ' इति, 'आपो हि' इत्यणुभ्यां गायत्र्या च स्नापयेत्। ओंरुद्धया तारपुटितया गायत्र्या कोणखण्डैः कोणखण्डस्थकलशैश्च। मन्त्रीति मन्त्राणामादिरेवात्रोच्यते, मन्त्रं समस्तं विद्वानित्यर्थः।।९५।।

विवरणम्

अणुभ्यामिति खण्डद्वयापेक्षं द्विवचनम्।।९५।।

तारेणावाह्याहिताङ्गाय तस्मै
सोमारुद्रा वीति दत्त्वार्घ्यपाद्ये।
गन्धं पुष्पं चापि तद्वत् पवित्रं
वस्त्रं सन्दद्यात् युवंवस्त्रजापी।।९६।।

विमर्शिनी

तारेणावाह्याहिताङ्गाय तारेणैव कृताङ्गाय तस्मै 'सोमारुद्रा विवृहतं' मन्त्रेणार्घ्यपाद्ये द्वे गन्धं पुष्पं चापि तद्वत् पवित्रं दत्त्वा युवं वस्त्रजापी वस्त्रं सन्दद्यात्।।९६।।

विवरणम्

तद्वदिति। पवित्रपर्यन्तेषु स एव मनुरित्यर्थः।।९६।।

दत्त्वोत्तरीयं च बृहस्पते अती-
त्यृचाथ वेदाहमृचोपवीतकम्।
स्वमूलतोऽलङ्करणानि धूरसी-
त्यनेन धूपं च तथा समर्पयेत्।।९७।।

---

१. 'संस्थैः'।। ख. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

अथ 'बृहस्पते अति' इत्यृचा उत्तरीयं दत्त्वा 'वेदाहम्' ऋचोपवीतं समर्पयेत्। स्वमूलतोऽलङ्करणानि, तथा 'धूरसि' इत्यनेन धूपं च।।९७।।

उद्दीप्यस्वेत्युपहरतु तस्मै प्रदीपं समिद्धो
अञ्जन्नित्यञ्जनमपि च गोरोचनां तारकेण।
सोमारुद्रा युवमिति जपन् दर्पणं दर्शयित्वा-
ग्नाविष्णू इत्यपि मनुवरेण स्तुतिं चादधीत।।९८।।

विमर्शिनी

पुनस्तस्मा 'उद्दीप्यस्व' इति प्रदीपमुपहरतु। 'समिद्धो अञ्जन्' इत्यञ्जनमपि च। तारकेण गोरोचनां च। 'सोमारुद्रा युवम्' इति जपन् दर्पणं दर्शयित्वा 'अग्नाविष्णू' इत्यपि मनुवरेण स्तुतिं चादधीत।।९८।।

विवरणम्

अग्नाविष्णू इति। 'अग्नाविष्णू सजोषसा वर्धन्तु गिरो या मम इन्द्रस्य पत्नीः पञ्चाग्रे सरस्वती' इति।।९८।।

युवमेतानीति प्रार्थ्यौषधय इति विकीर्य पुष्पमपि पुण्याहम्।
कृत्वा दद्यात् पादुकसचामरच्छत्रयानमपि तारेण।।९९।।

विमर्शिनी

पुनः 'युवमेतानि' इति प्रार्थ्य 'ओषधय' इति पुष्पं विकीर्य 'ओं शिवनारायणः प्रीयताम्' इति विशेषयुक्तं पुण्याहमपि कृत्वा पादुकसचामरच्छत्रयानमपि पादुकं चामरं छत्रं स्ववाहनमपि तारेण दद्यात्।।९९।।

विवरणम्

प्रार्थ्येत्युपस्थानम्।।९९।।

पूजाक्रमेण पुरुषादिचतुष्टयाङ्ग-

Shripuram Publications
www.shripuram.org

केशानसूक्तमनुभिः स्नपयेन्महेशे।
दिक्कोणमध्यगतखण्डघटैस्तु बिम्ब-
शुद्धौ तदीयपरिकुम्भगणैः समेतम्।।१००।।

विमर्शिनी

महेशे तु बिम्बशुद्धौ दिक्कोणमध्यगतखण्डघटैः दिक्खण्डेषु कोणखण्डेषु मध्यखण्डे[1] च ब्रह्मकलशैः तदीयपरिकुम्भगणैः समेतं यथा भवति तथा पूजाक्रमेण स्वस्वदिक्प्राप्तैः पुरुषादिचतुष्टयाङ्गकेशानसूक्तमनुभिः तत्पुरुषादिचतुष्टयेन पञ्चब्रह्माङ्गैः ईशानेन च मनुभिः तं स्नपयेत्।।१००।।

विवरणम्

पूजाक्रमेणेति। पुरुषाघोरसद्यवामैर्दिक्षु हृच्छिखाकवचशिरोभि[2]र्विदिक्ष्वि-त्यर्थः।।१००।।

ध्यात्वा देवमघोरतो दिशतु गन्धं वामतश्चाम्बरं
पुष्पं चापि शिवेन तत्पुरुषतो धूपं सदीपार्घ्यकम्।
आनम्याथ सुगन्धचर्चितकरो भागान् दिशास्वेकशो
वृत्तान्तान् विधिविष्णुरुद्रजिनवर्णैरालभेत क्रमात्।।१०१।।

विमर्शिनी

अथ देवं यथोक्तं ध्यात्वा आवाह्य सकलीकृत्य पाद्यमाचमनं च दत्त्वा अघोरतो गन्धं दिशतु। वामतोऽम्बरं च। शिवेन ईशानेन पुष्पाणि च। तत्पुरुषतो धूपं सदीपार्घ्यकं दीपमर्घ्यं च। अथानम्य नमस्कृत्य सुगन्धचर्चितकरो भूत्वा वृत्तान्तान् भागान् चतुरश्राष्टाश्रवृत्तभागानेकशः प्रत्येकं दिशासु विधिविष्णुरुद्रजिनवर्णैः ब्रह्मविष्णुरुद्रगायत्रीभिः क्रमाद् आलभेत संस्पृशेत्।।१०१।।

विवरणम्

ध्यात्वा देवमिति। 'शेषेष्वावाहनाद्यं स्नपने कृते तु' इत्येतदभिप्रायमेतत्। पाद्यादिभूषणान्तमुपचारतः समर्प्याघोरतो गन्धमित्यादि सर्वं कार्यम्। तदुक्तं-

---

१. 'ण्डेषु च' ङ. पाठः, २. 'भिश्च वि' घ. पाठः

Shripuram Publications
www.shripuram.org

"सकलीकत्य देवेशं पीठं सद्येन कल्पयेत्।
ततोऽपि लेपयेद्गन्धैर्मन्त्रेण बहुरूपिणा।।"

इत्यादि। शिवेनेति। ईशानेन[1]। आनम्येति तदुचितमन्त्रप्रणामस्तुत्याद्यभिप्रायम्। वृत्तान्तान् भागानिति। चतुरश्राष्टाश्रवृत्तक्रमेण[2] त्रिभागं हि लिङ्गं भवति। एकश इति। एकैकशो दिशास्वालभेत। सुगन्धाक्तकरतलस्तेन ब्रह्मगायत्र्या चतुरश्रभागमग्रादिदिक्ष्वालभ्य करतलं क्षालयेत्। एवमितरद्भागद्वयमपीति।।१०१।।

"तत्पुरुषाय विद्महे पितामहाय धीमहे।
तन्नो ब्रह्मा प्रचोदयात्।।
तत्पुरुषाय विद्महे जनार्दनाय धीमहे।
तन्नो विष्णुः प्रचोदयात्।।
तत्पुरुषाय विद्महे महादेवाय धीमहे।
तन्नो रुद्रः प्रचोदयात्।।"
तद्गायत्र्य इति प्रोक्ताः सितमाल्यादिभिस्ततः।
प्रार्च्य नीराज्य पुण्याहमाचरेन्मूर्त्तिपैः सह।।१०२।।

विमर्शिनी

तद्गायत्रीराह - तत्पुरुषायेति।।

इति तद्गायत्र्यः प्रोक्ताः। ततः सितमाल्यादिभिः श्वेतपुष्पगन्धादिभिः प्रार्च्य नीराज्य मूर्तिपैः सह पुण्याहमाचरेत्।।१०२।।

विवरणम्

सितमाल्यादिभिस्ततः प्रार्च्येति। यदुक्तं-

"ततः शुक्लानि पुष्पाणि दत्त्वा लिङ्गस्य मूर्धनि।
नीराजनविधिं कुर्याद् यच्चान्यदपि मङ्गलम्।।"

इति। यद्वा 'सितमाल्यादिभिर्बुधः' इति[3] पाठः। बुधशब्देन 'शेषेष्वावाहनाद्यम्' इत्येतदिदानीमेव कार्यम्। 'ध्यात्वा देवम्' इत्येतत्तु गन्धालेपनाद्युचिततया तद्रूपध्यानमात्रमिति सूचितम्। यदप्युक्तं - स्वस्वगायत्र्या स्पृशेत्।

१. 'नः।', २. 'णेति त्रि' घ. पाठः, ३. 'ति वा पा'

Shripuram Publications
www.shripuram.org

"आवाह्य सकलीकृत्य देवदेवमुमापतिम्।
पाद्याद्यैः परिपूज्यास्मिन् पुण्याहं च समाचरेत्।।"

इति। सितमाल्यादिभिरिति पाद्याद्यनन्तरं [1]जलगन्धादिषु मध्ये पुष्पे विशेषः प्रतिपादितः। जलगन्धाद्यर्घ्यान्तानामादिपदेन ग्रहणम्। बुधग्रहणेनैतदपि साधितमिति। नीराज्येति। तत्प्रक्रिया च प्रागुक्ता। पुरआदिपञ्चदिक्ष्वपि वा नीराजनं बुधशब्देन सूचितम्। तदुक्तं - नीराज्यास्त्रेण दिक्क्रमाद् इति।।१०२।।

मूलेनावाह्य तस्मै सकलितमहसे *स्थाणवे सम्प्रदद्यात्
पाद्याद्यं भूषणान्तं नवकमथ समर्प्योर्मिकाकर्णभूषाः।
इष्ट्वा गन्धादिभिः पादुकमपि सहयानातपत्रं प्रदद्यात्
सादर्शं चाथ पुण्याहमपि चरतु नीराजनं चेति वेज्या।।१०३।।

विमर्शिनी

पक्षान्तरमाह - मूलेनेति। मूलेनावाह्य सकलितमहसे सकलीकृततेजसे तस्मै स्थाणवे शिवाय पाद्याद्यं भूषणान्तं नवकं पाद्यार्घ्याचमनीयमधुपर्कपुनराचमनीयस्नानवस्त्रोपवीतभूषणानि सम्प्रदद्यात्। अथ ऊर्मिकाकर्णभूषाः अङ्गुलीयं कुण्डले च समर्प्य गन्धादिभिरिष्ट्वा पादुकमपि सहयानातपत्रं वाहनं छत्रं च सादर्शं दर्पणं च दद्यात्। अथ पुण्याहं नीराजनं चापि चरतु। इति वा इज्या पूजा स्यात्।।१०३।।

विवरणम्

शिव एव मतान्तरमाह - मूलेनावाह्येति। ब्रह्मादिगायत्रीभिर्भागत्रयस्पर्शनान्ते कृत एतत् सर्वं कार्यम्। कल्पवित् सम्प्रदद्यादिति च कल्पविद्ग्रहणमेतदर्थम्। यद्वा सितमाल्यादिभिरित्यत्रापि समानमावहनादि सर्वमिति। अथवोपचारेण तत्तद्द्रव्यशालिनां फडन्[2]त्प्रणवप्रोक्षणादिसंस्कृतानां पाद्यादीनां प्रदानार्थमेतदुक्तम्। ऊर्मिका अङ्गुलीयकम्। कर्णभूषे च द्वे भवतः। इष्ट्वा गन्धादिभिरित्यर्घ्यदानान्तमुक्तम्। इति वेज्येति। मूलेनावाहनादि सर्वं समानम्। [3]पाद्यादिपूजायामेव विकल्पोऽयमिति भावः।।१०३।।

दुर्गार्याद्यणुभिः क्रमात् स्नपितयेद् गव्यैर्मृदालिप्य मृ-
द्वारा वारुणपञ्चकेन महिषारौ पावमानाणुना।

---

१. 'गन्धादि' क. ख. पाठः, २. 'न्तप्रो' क. ख. पाठः, ३. 'वा' घ. पाठः
* स्थाणवे' इत्यस्य स्थाने कल्पविदिति विवरणरीत्या पाठः

Shripuram Publications
www.shripuram.org

क्वाथोदैरथ शालितण्डुलभुवा चूर्णेन लिप्त्वा समा-
सिञ्चेदञ्जितरत्नगन्धकलशाभ्यां पञ्चदुर्गाणुभिः ।।१०४।।

विमर्शिनी

महिषारौ मन्त्रोद्धारे वक्ष्यमाणैः दुर्गार्याद्यणुभिः पृथक् स्थितैः पञ्चभिर्गव्यैः क्रमात् स्नपितयेत् । स्वकलशोक्तया मृदा आलिप्य मृद्वारा मृज्जलपूर्णकलशेन वारुणपञ्चकेन 'अव ते हेलो वरुण' इत्यादिवक्ष्यमाणेन च । पुनः क्वाथोदैः पावमानाणुना 'पावमानीः स्वस्त्ययनीः' इति मन्त्रेण च । अथ शालितण्डुलभुवा चूर्णेनोद्वर्त्य अञ्चितरत्नगन्धकलशाभ्यां पूजिताभ्यां रत्नोदगन्धोदाभ्यां पञ्चदुर्गाणुभिश्च स्नपितयेत् ।।१०४।।

विवरणम्

दुर्गार्याद्यणुभिरिति । मूलेनावाहनादि कृत्वा अर्घ्याणि दत्त्वा स्नानविधावेवं स्नापयेत्[1] । यदुक्तं - 'आवाह्य साङ्गीकरणादि कृत्वा' इत्यादि । सें दुर्गायै[2] इत्यादिभिः । क्रमादिति पञ्चभिर्मन्त्रैः क्रमेण पञ्चभिर्गव्यैः स्नपनमुक्तम् । मृदालिप्येति । मृत्कलशोक्तमृद्भिरित्यर्थः । मृद्वारेति । मृत्कलशजलेन । 'तत्त्वा, इमं मे, अव ते हेळः, त्वं नो अग्ने, उदुत्तमम्' इति वारुणपञ्चकम् । पावमानाणुना क्वाथोदैरिति । पावमानानुवाकेनेत्यर्थः ।।१०४।।

www.shripuram.org www.shripuram.org Shripuram Publications
www.shripuram.orgShripuram Publications

www.shripuram.orgांशुके
रक्ते द्वे परिधाप्य तैर्दिशतु गन्धं पुष्पधूपावपि ।
दीपाकल्पवितानचामरयुगच्छत्राणि नीराज्य दि-
क्ष्वेनां सम्यगयंपुरः प्रभृतिभिः स्वोक्तैः स्तुवीताणुभिः ।।१०५।।

विमर्शिनी

---

१. 'स्न', २. 'यै ओं आर्यायै इ' घ. पाठः

३. 'सिक्त्वा बिम्बघटैर्विधाय विबुधैः पुण्याहमेतज्जलैः
सिक्त्वा रक्तनवांशुके च परिधाप्याभ्यर्च्य दुर्गाणुभिः ।
दत्त्वाकल्पवितानचामरयुगच्छत्राणि दिक्षु क्रमा-
न्मन्त्रैः सम्यगयंपुरः प्रभृतिभिर्नीराजयेत् पञ्चभिः ।।

से' क. पाठः

Shripuram Publications
www.shripuram.org

पुनः पुण्याहं 'ओं दुर्गा प्रीयताम्' इति विशेषयुक्तं विधाय शेषसलिलैः तैरेव पञ्चदुर्गाणुभिः सिक्त्वा रक्ते द्वे अंशुके वस्त्रे परिधाप्य तैः पञ्चदुर्गाणुभिर्गन्धं पुष्पधूपावपि दीपाकल्पवितानचामरयुगच्छत्राणि दीपमलङ्कारं वितानं चामरयुगं छत्रं च दिशतु। पुनरेनां दुर्गाम् अयंपुरःप्रभृतिभिः 'अयं पुरो हरिकेशः' इत्यादिभिर्मन्त्रैर्दिक्षु सम्यक् प्रत्येकं नीराज्य स्वोक्तैरणुभिः स्वागमोक्तमन्त्रैः स्तुवीत च।।१०५।।

विवरणम्

तैरेवेति[1]। तैरिति च पञ्चदुर्गाभिप्रायम्। नीराज्य दिक्ष्विति। 'अयं पुरो हरिकेशः' इत्यादिपञ्चमनुभिः क्रमेण प्रागाद्यूर्ध्वान्तं[2] पञ्च दिक्षु नीराजनमुक्तम्। स्वोक्तैः स्तुवीताणुभिरिति। तदुक्तम् -

"स्तुतिं च पश्चात् कुर्वीत साम्ना वाथर्वणेन[3] च।
तां (हे?मे)ति यजुषा चापि स्तुवीत पुरतः स्थितः।।"

इति।।१०५।।

सेनान्यां कलशैः स्वपूरणसमुक्तेन क्रमेणाञ्चितैः
सिञ्चेन्मन्त्रिवरः स्वमूलमनुना स्वास्त्राणुना वर्मणा।
मूलेनापि हृदाग्निमील इति पूर्वर्चा त्विषेत्वादिना
शन्नोदेव्यणुनोपचारमनुना कौशादिगन्धान्तिमैः।।१०६।।

विमर्शिनी

सेनान्यां तु मन्त्रिवरः मन्त्रक्रिययोरैक्यं विमृशन् गुरुः कौशादिगन्धान्तिमैरञ्चितैर्नवसु खण्डेषु स्थितैः सपरिकलशैः कलशैः क्रमात् स्वमूलमनुना स्वास्त्राणुना वर्मणा मूलेनापि हृदा 'अग्निमीळे' इति पूर्वर्चा 'इषे त्वा'दिना 'शन्नो देव्य'णुना उपचारमनुना च नवभिर्मन्त्रैः स्वपूरणसमुक्तेन क्रमेण सिञ्चेत्।।१०६।।

विवरणम्

सेनान्यामिति। नवकलशैर्नवमन्त्रैः क्रमेणाभिषेकः। मन्त्रिवर इति।

---

१. 'ति प' क. ख. पाठः, २. 'न्त', ३. 'ह्या', ४. 'न्ततो यो घ. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

मूलेनावाहनादिपूर्वकं स्नपनमेतदित्युक्तम्। यदुक्तम् - आवाह्य साङ्गीकरणादि कृत्वा इत्यादि। यद्वा सर्वत्र प्रणवमूलयोराद्यन्तयोग उक्तः।।१०६।।

संस्नाप्य स्वजिनार्णतो बहुजलैर्दत्त्वांशुके द्वे युवं
वस्त्राणीत्युपवीतगन्धकुसुमस्रग्धूपदीपान् क्रमात्।
दद्याच्चामरमातपत्रमुपचारेणाञ्जनं दर्पणं
तस्मै पादुकयुग्ममप्यथ चरेन्नीराज्य पुण्याहकम्।।१०७।।

विमर्शिनी

स्वजिनार्णतः स्वगायत्र्या बहुजलैः संस्नाप्य तस्मै स्कन्दाय 'युवं वस्त्राणि' इति मन्त्रेणांशुके द्वे दत्त्वा उपवीतगन्धकुसुमस्रग्धूपदीपान् चामरं चामरद्वयम् आतपत्रमञ्जनं दर्पणं पादुकयुग्ममपि क्रमादुपचारेण दद्यात्। अथ नीराज्य 'स्कन्दः प्रीयताम्' इति विशेषयुक्तं पुण्याहं चरेच्च।।१०७।।

विवरणम्

उपचारेणेति। उपवीतादिषु मन्त्रकथनम्।।१०७।।

स्वाष्टमूर्तिमनवः स्वकमूलं
चापि बिम्बकलशस्नपने स्युः।
विघ्नराजि निजमूलकमार्ये
मध्यनिष्ठमुभयोः स्नपनं स्यात्।।१०८।।

विमर्शिनी

विघ्नराजि बिम्बकलशस्नपने स्वाष्टमूर्तिमनवः गणञ्जयाद्याः स्वकमूलं चापि स्युः। आर्ये नवस्वपि निजमूलं च। अत्र विघ्ने बहिः प्रदक्षिणक्रमेण आर्ये दिग्विदिक्क्रमेणेति विशेषः। उभयोरपि मध्यनिष्ठं ब्रह्मकलशान्तं स्नपनं स्यात्।।१०८।।

पञ्चोपहारान् प्रददातु विघ्ने

www.shripuram.org

Shripuram Publications
www.shripuram.org

मूलेन ताञ्छास्तरि दर्पणं च।
नीराज्य पुण्याहमपि प्रकुर्या-
दितीरितात्राखिलबिम्बशुद्धिः।।१०९।।

विमर्शिनी

विघ्ने पञ्चोपहारान् जलगन्धपुष्पधूपदीपान् मूलेन प्रददातु। शास्तरि तान्[1] दर्पणं च। उभयोः नीराज्य पुण्याहमपि यथोक्तवत् कुर्यात्। अत्राखिलबिम्बशुद्धिरितीरिता।।१०९।।

विवरणम्

पञ्चोपहारनिति। मूलेनावाहनादि कृत्वा पाद्यादि दत्त्वा स्नपनं कार्यम्। पुनरङ्ग-वस्त्रादिभूषणान्ते दत्ते जलगन्धादिपञ्चोपहारदानं कार्यम्। पुनरर्घ्यमपि देयम्। मूलेनेति। अध उपरि च योज्यम्। तानिति। पञ्चोपहारान्। बिम्बशुद्धिप्रकरणमुपसंहरति - इतीरितेति।।१०९।।

दत्त्वार्घ्यमुत्तिष्ठमनुप्रजापी
प्रोत्थाप्य याने प्रविधाय बिम्बम्।
प्रदक्षिणप्रक्रमतो नयेत
तन्मण्डपं शाकुनकादिजापी।।११०।।

विमर्शिनी

अथ सर्वेष्वप्यर्घ्यं दत्त्वा उत्तिष्ठमनुप्रजापी 'उत्तिष्ठ ब्रह्मणस्पते' इति जपन् बिम्बं प्रोत्थाप्य रथादियाने प्रविधाय शाकुनकादिजापी 'कनिक्रदत्' 'स्वस्त्या'दिकं जपन् प्रदक्षिणप्रक्रमतस्तद् बिम्बं मण्डपं नयेत।।११०।।

विवरणम्

दत्त्वार्घ्यमिति। स्वस्वोपचारेणेति ज्ञेयम्। यान इति। ब्रह्मयाने रथादौ वा। प्रदक्षिणेति। मण्डपस्येति शेषः।।११०।।

रथारोपे रथे तिष्ठन्नखिलेऽणुः प्रदक्षिणे।
उदुत्यमिति शाङ्गींशे पौरुषं च जपेद्धरौ।।१११।।

---

१. 'न् दारुणं द' क. ख. पाठः, २. 'णुं' ख. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

अखिले सर्वेषु देवेषु रथारोपे 'रथे तिष्ठन्' इत्यणुः[2]। शाङ्गींशे प्रदक्षिणे 'उदु त्यं जातवेदसम्' इति, हरौ पौरुषं पुरुषसूक्तं च जपेत्।।१११।।

विवरणम्

पौरुषं च जपेद्धराविति। चकारः प्रदक्षिण इत्येतदनुकर्षणार्थः। शिवादिषु शाकुनस्वस्तिसूक्तजपेनैव प्रदक्षिणं भवति। 'शाकुनकादिजापी' इति चोक्तम्।।१११।।

दत्त्वा द्वार्युपचारतोऽर्घ्यमखिलेषूदुत्यमित्युच्चर-
न्नाकृष्णेन युतं शिवे समवतार्यान्तर्नयेन्मन्त्रवित्[1]।
आसत्येनमनुं गुहे हरिहरे यस्मिन्नृचः पूर्वकं
मन्त्री मन्त्रमिनाक्षरं मुररिपौ शेषेषु मूलं निजम्।।११२।।

विमर्शिनी

अखिलेषु द्वार्युपचारतोऽर्घ्यं दत्त्वा शिवे 'उदु त्यम्' 'आकृष्णेन' युतमुच्चरन् यानात् समवतार्यान्तर्नयेत्। गुहे 'आसत्येन'मनुं, हरिहरे यस्मिन्नृचःपूर्वकं 'यस्मिन् वृक्षे' इत्यादिकं, मुररिपौ इनाक्षरं द्वादशाक्षरं मन्त्रं, शेषेषु निजमूलं चोच्चरन् बिम्बमन्तर्नयेत्। मन्त्रविन्मन्त्रीति च पदाभ्यां तत्र शोभनान् मन्त्रान् यथावकाशमुच्चरेदिति सूचितम्।।११२।।

विवरणम्

दत्त्वा द्वारीति। मण्डपद्वारे इत्यर्थः। उदु त्यमिति। शिवे तस्माद् यानाद् 'उदु त्यम्' 'आकृष्णेन' इति चोच्चरन्नवतार्यान्तर्नयेत्। कल्पविदिति। वेदिशय्ययोः प्रादक्षिण्येन नयनमुक्तम्। यस्मिन्नृचःपूर्वकमिति। 'यस्मिन् ऋचः साम' इत्याद्यृचो ग्रहणम्। मन्त्रीति... ...। इनाक्षरं मुररिपाविति। द्वादशाक्षरम्।।११२।।

वामाणुना त्रिणयनेऽथ नमो हिरण्य-
बाह्वादिना न्यसतु शार्ङ्गिगशिवेऽधिशय्यम्।
सत्रिष्टुभा महिषविद्विषि तारकेण
शेषेषु मूलत इनार्णत इन्दिरेशे।।११३।।

---

१. 'कल्पवित्' इति विवरणरीत्या पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

अथ त्रिणयने वामाणुना 'वामदेवेन' अधिशय्यं शय्यायां न्यसतु। शार्ङ्गिशिवे नमो हिरण्यबाह्वादिना, महिषविद्विषि सत्रिष्टुभा तारकेण, शेषेषु मूलतः इन्दिरेशे विष्णौ इनार्णतो द्वादशाक्षरेण च न्यसतु।।११३।।

विश्वत इति त्रिधान्मि व्याप्यान्येषु स्वमूलतो बिम्बम्।
शाययतु सकलयित्वा मन्त्रैः प्रासादसम्मुखमिहोक्तैः।।११४।।

विमर्शिनी

त्रिधाम्नि 'विश्वतश्चक्षुः इति, अन्येषु स्वस्वमूलतश्च व्याप्य सकलयित्वा इहोक्तैः शय्यारोपणोक्तमन्त्रैः प्रासादसम्मुखं शाययतु।।११४।।

विवरणम्

विश्वत इति त्रिधाम्नि व्याप्येति। सकलयित्वा शाययत्वित्यन्वयः। मन्त्रैरिहोक्तैः प्रासादसम्मुखं शाययत्विति। वामदेवाद्युक्तमन्त्रैरेवेत्यर्थः। यदुक्तम् - 'गुह्येनेशं तु शाययेत्' इत्यादि। यद्वा इहेति शयनविषये तन्त्रान्तरोक्तैरिति। यदुक्तम् - 'विष्णौ शययेच्चायं सो अग्निः सर्वयोगेश्वरोम्' इति। शिवे 'सकळीकृत्य वामेन अयं स इति शाययेत्' इति। हरिहरे 'नमो हिरण्यबाहवे' 'अयं स' इति। दौर्गे तारेण, स्कन्दे मूलेन, गणपतौ शास्तरि च बीजेनेति।।११४।।

पीठे संस्थाप्योपचर्यार्घ्यनिष्ठैः
स्कन्दे बिम्बं शाययेच्चाधिशय्यम्।
प्रासादे प्राग्द्वार्युदक्छीर्षकं च
प्रत्यग्द्वारे याम्यदिक्छीर्षकं च।।११५।।

विमर्शिनी

स्कन्दे तु पीठे संस्थाप्य अर्घ्यनिष्ठैः अर्घ्यावसानैरुपचारैरुपचर्य अधिशय्यं शय्यायां प्रासादे प्राग्द्वारि सत्युदक्छीर्षकमुत्तरशिरस्कं, प्रासादे प्रत्यग्द्वारे याम्यदिक्शीर्षकं दक्षिणशिरस्कं च बिम्बं शाययेत्।।११५।।

Shripuram Publications
www.shripuram.org

विवरणम्

स्कन्दे भेदमाह - पीठे संस्थाप्येति। भद्रपीठे पुरैव पूजितपीठे प्रासादाभिमुखतया स्थापनमुक्तम्। उपचर्यार्घ्यनिष्ठैरिति। उपचरणं पूजनं स्वोपचारेण चैतदिष्यते। अर्घ्यनिष्ठैरिति पाद्यार्घ्ययोर्ग्रहणम्। बहुवचनेनासनमपि गृह्यते। मूलेन व्यापय्य सकलीकरणमिहाप्युचितमेव[१]। विष्ण्वादिषु शय्यायामेव न्यासेऽपि तदनन्तरं सकलीकरणानन्तरमेव[२] पाद्यार्घ्योपचरणमप्युपचारेणोचितं[३] भवति। शाययेच्चाधिशय्यमिति। शय्यायां मूलेन तच्छय्यौचित्येनोत्तरशिरस्कं दक्षिणशिरस्कं वा शाययेदित्यर्थः। यदुक्तम्-

"शय्यां दक्षिणसौम्यदिक्कृतसमायामाम्" इति।।११५।।

इति तन्त्रसमुच्चयविवरणे चतुर्थः पटलः।।

इति तन्त्रसमुच्चये तुरीयः
पटलो मण्डपसंस्क्रियाक्रमाढ्यः।
कथितः कलशेशवह्निशय्या-
विधिमान् बिम्बविशुद्धिविध्युपेतः।।११६।।

विमर्शिनी

पटलमुपसंहरति - इतीति। (इति) तन्त्रसमुच्चये ग्रन्थे तुरीयः चतुर्थः पटलः कथितः। कथम्भूतः, मण्डपसंस्क्रियाक्रमाढ्यः मण्डपसंस्कारपरिपाट्या परिपूर्णः। कलशेशवह्निशय्याविधिमान् कुम्भेशपूजाग्निजननशय्यापूजादिभिश्च युक्तः। बिम्बविशुद्धिविध्युपेतः बिम्बशुद्धिकलशाभिषेकेण उपहारदानेन चोपेतः।।११६।।

इति तन्त्रसमुच्चयविमर्शिन्यां चतुर्थः पटलः।।

शुभं भूयात्।

---

१. 'पि ह्युचि' क. ख. पाठः, २. 'वा', ३. 'चरताम' घ. पाठः

www.shripuram.org
Shripuram Publication
www.shripuram.org